Skandapurana Chapters 1-25

# ॥ स्कन्दपुराण १ २५

## स्कंदपुराण अध्याय १

SP0010011 नमः परमदेवाय त्रैगुण्याविजितात्मने ।
SP0010012 सर्वतो योगरूपाय संसाराभावहेतवे ॥
SP0010021 स्थितिसंरोधसर्गाणां हेतवेऽन्तःप्रसारिणे ।
SP0010022 षड्विंशाय प्रधानाय महादेवाय धीमते ॥
SP0010031 प्रजापतेर्महाक्षेत्रे गश्ण्गाकालिन्दिसंगमे ।
SP0010032 प्रयागे परमे पुण्ये ब्रह्मणो लोकवर्त्मनि ॥
SP0010041 मुनयः संशितात्मानस्तपसा क्षीणकल्मषाः ।
SP0010042 तीर्थसंप्लवनार्थाय पौर्णमास्यां कृताह्निकाः ॥
SP0010051 पौराणिकमपश्यन्त सूतं सत्यपरायणम् ।
SP0010052 स्नात्वा तस्मिन्महातीर्थे प्रणामार्थमुपागतम् ॥
SP0010061 दृष्ट्वा ते सूतमायान्तमृषयो हृष्टमानसाः ।
SP0010062 आशास्यासनसंवेशं तद्योग्यं समकल्पयन् ॥
SP0010071 स प्रणम्य च तान्सर्वान्सूतस्तान्मुनिपुंगवान् ।
SP0010072 प्रदत्तमासनं भेजे सर्वधर्मसमन्वितः ॥
SP0010081 तमासीनमपृच्छन्त मुनयस्तपसैधिताः ।
SP0010082 ब्रह्मसत्त्रे पुरा साधो नैमिशारण्यवासिनाम् ॥
SP0010091 कथितं भारताख्यानं पुराणं च परं त्वया ।
SP0010092 तेन नः प्रतिभासि त्वं साक्षात्सत्यवतीसुतः ॥
SP0010101 सर्वागमपरार्थज्ञः सत्यधर्मपरायणः ।
SP0010102 द्विजपूजारतो नित्यं तेन पृच्छां त्वमर्हसि ॥
SP0010111 भारताख्यानसदृशं पुराणाद्यद्विशिष्यते ।
SP0010112 तत्त्वा पृच्छाम वै जन्म कार्त्तिकेयस्य धीमतः ॥
SP0010121 इमे हि मुनयः सर्वे त्वदुपास्तिपरायणाः ।
SP0010122 स्कन्दसंभवशुश्रूषासंजातौत्सुक्यमानसाः ॥
SP0010131 एवमुक्तस्तदा सूतः संसिद्धैर्मुनिपुंगवैः ।
SP0010132 प्रोवाचेदं मुनीन्सर्वान्वचो भूतार्थवाचकम् ॥
SP0010141 शृणुध्वं मुनयः सर्वे कार्त्तिकेयस्य सम्भवम् ।
SP0010142 ब्रह्मण्यत्वं समाहात्म्यं वीर्यं च त्रिदशाधिकम् ॥
SP0010151 मुमुक्षया परं स्थानं याते शुकमहात्मनि ।
SP0010152 सुतशोकाभिसंतप्तो व्यासस्त्र्यम्बकमैक्षत ॥

SP0010161 दृष्ट्वैव स महेशानं व्यासोऽभूद्विगतव्यथः ।
SP0010162 विचरन्स तदा लोकान्मुनिः सत्यवतीसुतः ॥
SP0010171 मेरुशृङ्गेऽथ ददृशे ब्रह्मणः सुतमग्रजम् ।
SP0010172 सनत्कुमारं वरदं योगैश्वर्यसमन्वितम् ॥
SP0010181 विमाने रविसंकाशे तिष्ठन्तमनलप्रभम् ।
SP0010182 मुनिभिर्योगसंसिद्धैस्तपोयुक्तैर्महात्मभिः ॥
SP0010191 वेदवेदाङ्गतत्त्वज्ञैः सर्वधर्मागमान्वितैः ।
SP0010192 सकलावाप्तविद्यैस्तु चतुर्वक्त्रमिवावृतम् ॥
SP0010201 दृष्ट्वा तं सुमहात्मानं व्यासो मुनिमथास्थितम् ।
SP0010202 ववन्दे परया भक्त्या साक्षादिव पितामहम् ॥
SP0010211 ब्रह्मसूनुरथ व्यासं समायातं महौजसम् ।
SP0010212 परिष्वज्य परं प्रेम्णा प्रोवाच वचनं शुभम् ॥
SP0010221 दिष्ट्या त्वमसि धर्मज्ञ प्रसादात्पारमेश्वरात् ।
SP0010222 अपेतशोकः सम्प्राप्तः पृच्छस्व प्रवदाम्यहम् ॥
SP0010231 श्रुत्वाथ वचनं सूनोर्ब्रह्मणो मुनिपुंगवः ।
SP0010232 इदमाह वचो विप्राश्चिरं यद्धृदये स्थितम् ॥
SP0010241 कुमारस्य कथं जन्म कार्त्तिकेयस्य धीमतः ।
SP0010242 किंनिमित्तं कुतो वास्य इच्छाम्येतद्धि वेदितुम् ॥
SP0010251 कथं रुद्रसुतश्चासौ वह्निगङ्गासुतः कथम् ।
SP0010252 उमायास्तनयश्चैव स्वाहायाश्च कथं पुनः ।
SP0010253 सुपर्ण्याश्चाथ मात्ॣणां कृत्तिकानां कथं च सः ॥
SP0010261 कश्चासौ पूर्वमुत्पन्नः किंतपाः कश्च विक्रमः ।
SP0010262 भूतसंमोहनं ह्येतत्कथयस्व यथातथम् ॥
SP0010270 सूत उवाच ।
SP0010271 एवं स पृष्टस्तेजस्वी ब्रह्मणः पुत्रसत्तमः ।
SP0010272 उवाच सर्वं सर्वज्ञो व्यासायाक्लिष्टकारिणे ।
SP0010273 तच्छृणुध्वं यथातत्त्वं कीर्त्यमानं मयानघाः ॥
SP0019999 इति स्कन्दपुराणे प्रथमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय २

SP0020010 सनत्कुमार उवाच ।
SP0020011 प्रपद्ये देवमीशानं सर्वज्ञमपराजितम् ।
SP0020012 महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥
SP0020021 शक्तिरप्रतिघा यस्य ऐश्वर्यं चैव सर्वशः ।
SP0020022 स्वामित्वं च विभुत्वं च स्वकृतानि प्रचक्षते ॥
SP0020031 तस्मै देवाय सोमाय प्रणम्य प्रयतः शुचिः ।

SP0020032 पुराणाख्यानजिज्ञासोर्वक्ष्ये स्कन्दोद्भवं शुभम् ॥
SP0020041 देहावतारो देवस्य रुद्रस्य परमात्मनः ।
SP0020042 प्राजापत्याभिषेकश्च हरणं शिरसस्तथा ॥
SP0020051 दर्शनं षड्कुलीयानां चक्रस्य च विसर्जनम् ।
SP0020052 नैमिशस्योद्भवश्चैव सत्त्रस्य च समापनम् ॥
SP0020061 ब्रह्मणश्चागमस्तत्र तपसश्चरणं तथा ।
SP0020062 शर्वस्य दर्शनं चैव देव्याश्चैव समुद्भवः ॥
SP0020071 सत्या विवादश्च तथा दक्षशापस्तथैव च ।
SP0020072 मेनायां च यथोत्पत्तिर्यथा देव्याः स्वयंवरम् ॥
SP0020081 देवानां वरदानं च वसिष्ठस्य च धीमतः ।
SP0020082 पराशरस्य चोत्पत्तिर्व्यासस्य च महात्मनः ॥
SP0020091 वसिष्ठकौशिकाभ्यां च वैरोद्भवसमापनम् ।
SP0020092 वाराणस्याश्च शून्यत्वं क्षेत्रमाहात्म्यवर्णनम् ॥
SP0020101 रुद्रस्य चात्र सांनिध्यं नन्दिनश्चाप्यनुग्रहः ।
SP0020102 गणानां दर्शनं चैव कथनं चाप्यशेषतः ॥
SP0020111 कालीव्याहरणं चैव तपश्चरणमेव च ।
SP0020112 सोमनन्दिसमाख्यानं वरदानं तथैव च ॥
SP0020121 गौरीत्वं पुत्रलम्भश्च देव्या उत्पत्तिरेव च ।
SP0020122 कौशिक्या भूतमातृत्वं सिंहाश्च रथिनस्तथा ॥
SP0020131 गौर्याश्च निलयो विन्ध्ये विन्ध्यसूर्यसमागमः ।
SP0020132 अगस्त्यस्य च माहात्म्यं वधः सुन्दनिसुन्दयोः ॥
SP0020141 निसुम्भसुम्भनिर्याणं महिषस्य वधस्तथा ।
SP0020142 अभिषेकश्च कौशिक्या वरदानमथापि च ॥
SP0020151 अन्धकस्य तथोत्पत्तिः पृथिव्याश्चैव बन्धनम् ।
SP0020152 हिरण्याक्षवधश्चैव हिरण्यकशिपोस्तथा ॥
SP0020161 बलिसंयमनं चैव देव्याः समय एव च ।
SP0020162 देवानां गमनं चैव अग्नेर्दूतत्वमेव च ॥
SP0020171 देवानां वरदानं च शुक्रस्य च विसर्जनम् ।
SP0020172 सुतस्य च तथोत्पत्तिर्देव्याश्चान्धकदर्शनम् ॥
SP0020181 शैलादिदैत्यसंमर्दो देव्याश्च शतरूपता ।
SP0020182 आर्यावरप्रदानं च शैलादिस्तव एव च ॥
SP0020191 देवस्यागमनं चैव वृत्तस्य कथनं तथा ।
SP0020192 पतिव्रतायाश्चाख्यानं गुरुशुश्रूषणस्य च ॥
SP0020201 आख्यानं पञ्चचूडायास्तेजसश्चाप्यधृष्यता ।
SP0020202 दूतस्यागमनं चैव संवादोऽथ विसर्जनम् ॥
SP0020211 अन्धकासुरसंवादो मन्दरागमनं तथा ।

SP0020212 गणानामागमश्चैव संख्यानश्रवणं तथा ॥
SP0020221 निग्रहश्चान्धकस्याथ युद्धेन महता तथा ।
SP0020222 शरीरार्धप्रदानं च अशोकसुतसंग्रहः ॥
SP0020231 भस्मसोमोद्भवश्चैव श्मशानवसतिस्तथा ।
SP0020232 रुद्रस्य नीलकण्ठत्वं तथायतनवर्णनम् ॥
SP0020241 उत्पत्तिर्यक्षराजस्य कुबेरस्य च धीमतः ।
SP0020242 निग्रहो भुजगेन्द्राणां शिखरस्य च पातनम् ॥
SP0020251 त्रैलोक्यस्य सशक्रस्य वशीकरणमेव च ।
SP0020252 देवसेनाप्रदानं च सेनापत्याभिषेचनम् ॥
SP0020261 नारदस्यागमश्चैव तारकप्रेषितस्य ह ।
SP0020262 वधश्च तारकस्योग्रो यात्रा भद्रवटस्य च ॥
SP0020271 महिषस्य वधश्चैव क्रौञ्चस्य च निबर्हणम् ।
SP0020272 शक्तेरुद्धरणं चैव तारकस्य वधः शुभः ॥
SP0020281 देवासुरभयोत्पत्तिस्त्रैपुरं युद्धमेव च ।
SP0020282 प्रह्लादविग्रहश्चैव कृतघ्नाख्यानमेव च ।
SP0020283 महाभाग्यं ब्राह्मणानां विस्तरेण प्रकीर्त्यते ॥
SP0020291 एतज्ज्ञात्वा यथावद्धि कुमारानुचरो भवेत् ।
SP0020292 बलवान्मतिसम्पन्नः पुत्रं चाप्नोति संमतम् ॥
SP0029999 इति स्कन्दपुराणे द्वितीयोऽध्यायः ॥

---

## स्कंदपुराण अध्याय ३

SP0030010 सनत्कुमार उवाच ।
SP0030011 शृणुष्वेमां कथां दिव्यां सर्वपापप्रणाशनीम् ।
SP0030012 कथ्यमानां मया चित्रां बह्वर्थां श्रुतिसंमिताम् ।
SP0030013 यां श्रुत्वा पापकर्मापि गच्छेच्च परमां गतिम् ॥
SP0030021 न नास्तिकाश्रद्दधाने शठे चापि कथंचन ।
SP0030022 इमां कथामनुब्रूयात्तथा चासूयके नरे ॥
SP0030031 इदं पुत्राय शिष्याय धार्मिकायानसूयवे ।
SP0030032 कथनीयं महाब्रह्मन्देवभक्ताय वा भवेत् ।
SP0030033 कुमारभक्ताय तथा श्रद्दधानाय चैव हि ॥
SP0030041 पुरा ब्रह्मा प्रजाध्यक्षः अण्डेऽस्मिन्सम्प्रसूयते ।
SP0030042 सोऽज्ञानात्पितरं ब्रह्मा न वेद तमसावृतः ॥
SP0030051 अहमेक इति ज्ञात्वा सर्वा/ल्लोकानवैक्षत ।
SP0030052 न चापश्यत तत्रान्यं तपोयोगबलान्वितः ॥
SP0030061 पुत्र पुत्रेति चाप्युक्तो ब्रह्मा शर्वेण धीमता ।
SP0030062 प्रणतः प्राञ्जलिर्भूत्वा तमेव शरणं गतः ॥

SP0030071 स दत्त्वा ब्रह्मणे शम्भुः स्रष्टृत्वं ज्ञानसंहितम् ।
SP0030072 विभुत्वं चैव लोकानामन्तर्धे परमेश्वरः ॥
SP0030081 तदेषोपनिषत्प्रोक्ता मया व्यास सनातना ।
SP0030082 यां श्रुत्वा योगिनो ध्यानात्प्रपद्यन्ते महेश्वरम् ॥
SP0030091 ब्रह्मं च यो विदधे पुत्रमग्रे ज्ञानं च यः प्रहिणोति स्म तस्मै ।
SP0030092 तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥
SP0030101 स व्यास पितरं दृष्ट्वा स्वदीप्त्या परया युतम् ।
SP0030102 पुत्रकामः प्रजाहेतोस्तपस्तीव्रं चकार ह ॥
SP0030111 महता योगतपसा युक्तस्य सुमहात्मनः ।
SP0030112 अचिरेणैव कालेन पिता सम्प्रतुतोष ह ॥
SP0030121 दर्शनं चागमत्तस्य वरदोऽस्मीत्युवाच ह ।
SP0030122 स तुष्टाव नतो भूत्वा कृत्वा शिरसि चाञ्जलिम् ॥
SP0030131 नमः परमदेवाय देवानामपि वेधसे ।
SP0030132 स्रष्ट्रे वै लोकतन्त्राय ब्रह्मणः पतये नमः ॥
SP0030141 एकस्मै शक्तियुक्ताय अशक्तिरहिताय च ।
SP0030142 अनन्तायाप्रमेयाय इन्द्रियाविषयाय च ॥
SP0030151 व्यापिने व्याप्तपूर्वाय अधिष्ठात्रे प्रचोदिने ।
SP0030152 कृतप्रचेतनायैव तत्त्वविन्यासकारिणे ॥
SP0030161 प्रधानचोदकायैव गुणिनां शान्तिदाय च ।
SP0030162 दृष्टिदाय च सर्वेषां स्वयं वै दर्शनाय च ॥
SP0030171 विषयग्राहिणे चैव नियमस्य च कारिणे ।
SP0030172 मनसः करणानां च तत्रैव नियमस्य च ॥
SP0030181 भूतानां गुणकर्त्रे च शक्तिदाय तथैव च ।
SP0030182 कर्त्रे ह्यण्डस्य मह्यं च अचिन्त्यायाग्रजाय च ।
SP0030183 अप्रमेय पितर्नित्यं प्रीतो नो दिश शक्वरीम् ॥
SP0030191 तस्यैवं स्तुवतो व्यास देवदेवो महेश्वरः ।
SP0030192 तुष्टोऽब्रवीत्स्वयं पुत्रं ब्रह्माणं प्रणतं तथा ॥
SP0030201 यस्मात्ते विदितं वत्स सूक्ष्ममेतन्महाद्युते ।
SP0030202 तस्माद्ब्रह्मेति लोकेषु नाम्ना ख्यातिं गमिष्यसि ॥
SP0030211 यस्माच्चाहं पितेत्युक्तस्त्वया बुद्धिमतां वर ।
SP0030212 तस्मात्पितामहत्वं ते लोके ख्यातिं गमिष्यति ॥
SP0030221 प्रजार्थं यच्च ते तप्तं तप उग्रं सुदुश्चरम् ।
SP0030222 तस्मात्प्रजापतित्वं ते ददानि प्रयतात्मने ॥
SP0030231 एवमुक्त्वा स देवेशो मूर्तिमत्योऽसृजत्स्त्रियः ।
SP0030232 यास्ताः प्रकृतयस्त्वष्टौ विशेषाश्चेन्द्रियैः सह ।
SP0030233 भावाश्च सर्वे ते देवमुपतस्थुः स्वरूपिणः ॥

SP0030241 तानुवाच ततो देवः पतिर्युक्तः स्वतेजसा ।
SP0030242 एतमद्याभिषेकेण सम्पादयत मा चिरम् ॥
SP0030251 ताभिः स्वं स्वं समादाय भावं दिव्यमतर्कितम् ।
SP0030252 अभिषिक्तो बभूवेति प्रजापतिरतिद्युतिः ॥
SP0030261 तत्रैवं योगिनः सूक्ष्मं दृष्ट्वा दिव्येन चक्षुषा ।
SP0030262 पुराणं योगतत्त्वज्ञा गायन्ति त्रिगुणान्वितम् ॥
SP0030271 रुद्रः स्रष्टा हि सर्वेषां भूतानां तव च प्रभो ।
SP0030272 अस्माभिश्च भवान्सार्धं जगतः सम्प्रवर्तकः ॥
SP0030281 स देवस्तोषितः सम्यक्परमैश्वर्ययोगधृक् ।
SP0030282 ब्रह्माणमग्रजं पुत्रं प्राजापत्येऽभ्यषेचयत् ॥
SP0030291 यः कृत्वा बहुविधमार्गयोगयुक्तं तत्त्वाख्यं जगदिदमादराद्युयोज ।
SP0030292 देवानां परममनन्तयोगयुक्तं मायाभिस्त्रिभुवनमन्धमप्रसादम् ॥
SP0030301 सर्वेषां मनसि सदावतिष्ठमानो जानानः शुभमशुभं च भूतनाथः ।
SP0030302 तं देवं प्रमथपतिं प्रणम्य भक्त्या नित्यं वै शरणमुपैमि सूक्ष्मसूक्ष्मम् ॥
SP0039999 इति स्कन्दपुराणे तृतीयोऽध्यायः ॥

---

## स्कंदपुराण अध्याय ४

SP0040010 सनत्कुमार उवाच ।
SP0040011 प्राजापत्यं ततो लब्ध्वा प्रजाः स्रष्टुं प्रचक्रमे ।
SP0040012 प्रजास्ताः सृज्यमानाश्च न विवर्धन्ति तस्य ह ॥
SP0040021 स कुर्वाणस्तथा सृष्टिं शक्तिहीनः पितामहः ।
SP0040022 सृष्ट्यर्थं भूय एवाथ तपश्चर्तुं प्रचक्रमे ॥
SP0040031 सृष्टिहेतोस्तपस्तस्य ज्ञात्वा त्रिभुवनेश्वरः ।
SP0040032 तेजसा जगदाविश्य आजगाम तदन्तिकम् ।
SP0040033 स्रष्टा तस्य जगन्नाथोऽदर्शयत्स्वतनौ जगत् ॥
SP0040041 स्वयमागत्य देवेशो महाभूतपतिर्हरः ।
SP0040042 व्याप्येव हि जगत्कृत्स्नं परमेण स्वतेजसा ।
SP0040043 शम्भुः प्राह वरं वत्स याचस्वेति पितामहम् ॥
SP0040051 तं ब्रह्मा लोकसृष्ट्यर्थं पुत्रस्त्वं मनसाब्रवीत् ।
SP0040052 स ज्ञात्वा तस्य संकल्पं ब्रह्मणः परमेश्वरः ।
SP0040053 मूढोऽयमिति संचिन्त्य प्रोवाच वरदः स्वयम् ॥
SP0040061 आगतं पितरं मा त्वं यस्मात्पुत्रं समीहसे ।
SP0040062 मन्मूर्तिस्तनयस्तस्माद्भविष्यति ममाज्ञया ॥
SP0040071 स च ते पुत्रतां यात्वा मदीयो गणनायकः ।
SP0040072 रुद्रो विग्रहवान्भूत्वा मूढ त्वां विनयिष्यति ॥
SP0040081 सर्वविद्याधिपत्यं च योगानां चैव सर्वशः ।

SP0040082 बलस्याधिपतित्वं च अस्त्राणां च प्रयोक्तृता ॥
SP0040091 मया दत्तानि तस्याशु उपस्थास्यन्ति सर्वशः ।
SP0040092 धनुः पिनाकं शूलं च खड्गं परशुरेव च ॥
SP0040101 कमण्डलुस्तथा दण्डः अस्त्रं पाशुपतं तथा ।
SP0040102 संवर्तकाशनिश्चैव चक्रं च प्रतिसर्गिकम् ।
SP0040103 एवं सर्वर्द्धिसम्पन्नः सुतस्ते स भविष्यति ॥
SP0040111 एवमुक्त्वा गते तस्मिन्नन्तर्धानं महात्मनि ।
SP0040112 ब्रह्मा चक्रे तदा चेष्टिं पुत्रकामः प्रजापतिः ॥
SP0040121 स जुह्वञ्छ्रमसंयुक्तः प्रतिघातसमन्वितः ।
SP0040122 समिद्युक्तेन हस्तेन ललाटं प्रममार्ज ह ॥
SP0040131 समित्संयोगजस्तस्य स्वेदबिन्दुर्ललाटजः ।
SP0040132 पपात ज्वलने तस्मिन्द्विगुणं तस्य तेजसा ॥
SP0040141 तद्धि माहेश्वरं तेजः संधितं ब्रह्मणि स्रुतम् ।
SP0040142 प्रेरितं देवदेवेन निपपात हविर्भुजि ॥
SP0040151 क्षणे तस्मिन्महेशेन स्मृत्वा तं वरमुत्तमम् ।
SP0040152 प्रेषितो गणपो रुद्रः सद्य एवाभवत्तदा ॥
SP0040161 तच्च संस्वेदजं तेजः पूर्वं ज्वलनयोजितम् ।
SP0040162 भूत्वा लोहितमाश्वेव पुनर्नीलमभूत्तदा ॥
SP0040171 नीललोहित इत्येव तेनासावभवत्प्रभुः ।
SP0040172 त्र्यक्षो दशभुजः श्रीमान्ब्रह्माणं छादयन्निव ॥
SP0040181 शर्वाद्यैर्नामभिर्ब्रह्मा तनूभिश्च जलादिभिः ।
SP0040182 स्तुत्वा तं सर्वगं देवं नीललोहितमव्ययम् ॥
SP0040191 ज्ञात्वा सर्वसृजं पश्चान्महाभूतप्रतिष्ठितम् ।
SP0040192 असृजद्द्विविधास्त्वन्याः प्रजाः स जगति प्रभुः ॥
SP0040201 सोऽपि योगं समास्थाय ऐश्वर्येण समन्वितः ।
SP0040202 लोकान्सर्वान्समाविश्य धारयामास सर्वदा ॥
SP0040211 ब्रह्मणोऽपि ततः पुत्रा दक्षधर्मादयः शुभाः ।
SP0040212 असृजन्त प्रजाः सर्वा देवमानुषसंकुलाः ॥
SP0040221 अथ कालेन महता कल्पेऽतीते पुनः पुनः ।
SP0040222 प्रजा धारयतो योगादस्मिन्कल्प उपस्थिते ॥
SP0040231 प्रतिष्ठितायां वार्त्तायां प्रवृत्ते वृष्टिसर्जने ।
SP0040232 प्रजासु च विवृद्धासु प्रयागे यजतश्च ह ॥
SP0040241 ब्रह्मणः षड्कुलीयास्ते ऋषयः संशितव्रताः ।
SP0040242 मरीचयोऽत्रयश्चैव वसिष्ठाः क्रतवस्तथा ॥
SP0040251 भृगवोऽङ्गिरसश्चैव तपसा दग्धकिल्बिषाः ।
SP0040252 ऊचुर्ब्रह्माणमभ्येत्य सहिताः कर्मणोऽन्तरे ॥

SP0040261 भगवन्नन्धकारेण महता स्मः समावृताः ।
SP0040262 खिन्ना विवदमानाश्च न च पश्याम यत्परम् ॥
SP0040271 एतं नः संशयं देव चिरं हृदि समास्थितम् ।
SP0040272 त्वं हि वेत्थ यथातत्त्वं कारणं परमं हि नः ॥
SP0040281 किं परं सर्वभूतानां बलीयश्चापि सर्वतः ।
SP0040282 केन चाधिष्ठितं विश्वं को नित्यः कश्च शाश्वतः ॥
SP0040291 कः स्रष्टा सर्वभूतानां प्रकृतेश्च प्रवर्तकः ।
SP0040292 कोऽस्मान्सर्वेषु कार्येषु प्रयुनक्ति महामनाः ॥
SP0040301 कस्य भूतानि वश्यानि कः सर्वविनियोजकः ।
SP0040302 कथं पश्येम तं चैव एतन्नः शंस सर्वशः ॥
SP0040311 एवमुक्तस्ततो ब्रह्मा सर्वेषामेव संनिधौ ।
SP0040312 देवानां च ऋषीणां च गन्धर्वोरगरक्षसाम् ॥
SP0040321 यक्षाणामसुराणां च ये च कुत्र प्रवर्तकाः ।
SP0040322 पक्षिणां सपिशाचानां ये चान्ये तत्समीपगाः ।
SP0040323 उत्थाय प्राञ्जलिः प्राह रुद्रेति त्रिः प्लुतं वचः ॥
SP0040331 स चापि तपसा शक्यो द्रष्टुं नान्येन केनचित् ।
SP0040332 स स्रष्टा सर्वभूतानां बलवांस्तन्मयं जगत् ।
SP0040333 तस्य वश्यानि भूतानि तेनेदं धार्यते जगत् ॥
SP0040341 ततस्ते सर्वलोकेशा नमश्चक्रुर्महात्मने ॥
SP0040350 ऋषय ऊचुः ।
SP0040351 किं तन्महत्तपो देव येन दृश्येत स प्रभुः ।
SP0040352 तन्नो वदस्व देवेश वरदं चाभिधत्स्व नः ॥
SP0040360 पितामह उवाच ।
SP0040361 सत्त्रं महत्समासध्वं वाङ्मनोदोषवर्जिताः ।
SP0040362 देशं च वः प्रवक्ष्यामि यस्मिन्देशे चरिष्यथ ॥
SP0040371 ततो मनोमयं चक्रं स सृष्ट्वा तानुवाच ह ।
SP0040372 क्षिप्तमेतन्मया चक्रमनुव्रजत मा चिरम् ॥
SP0040381 यत्रास्य नेमिः शीर्येत स देशस्तपसः शुभः ।
SP0040382 ततो मुमोच तच्चक्रं ते च तत्समनुव्रजन् ॥
SP0040391 तस्य वै व्रजतः क्षिप्रं यत्र नेमिरशीर्यत ।
SP0040392 नैमिशं तत्स्मृतं नाम्ना पुण्यं सर्वत्र पूजितम् ॥
SP0040401 तत्पूजितं देवमनुष्यसिद्धै रक्षोभिरुग्रैरुरगैश्च दिव्यैः ।
SP0040402 यक्षैः सगन्धर्वपिशाचसंघैः सर्वाप्सरोभिश्च दितेः सुतैश्च ॥
SP0040411 विप्रैश्च दान्तैः शमयोगयुक्तैस्तीर्थैश्च सर्वैरपि चावनीध्रैः ।
SP0040412 गन्धर्वविद्याधरचारणैश्च साध्यैश्च विश्वैः पितृभिः स्तुतं च ॥
SP0049999 इति स्कन्दपुराणे चतुर्थोऽध्यायः ॥

# स्कंदपुराण अध्याय ५

SP0050010 सनत्कुमार उवाच ।
SP0050011 तन्नैमिशं समासाद्य ऋषयो दीप्ततेजसः ।
SP0050012 दिव्यं सत्त्रं समासन्त महद्वर्षसहस्रिकम् ॥
SP0050021 एकाग्रमनसः सर्वे निर्ममा ह्यनहंकृताः ।
SP0050022 ध्यायन्तो नित्यमीशेशं सदारतनयाग्नयः ॥
SP0050031 तन्निष्ठास्तत्पराः सर्वे तद्युक्तास्तदपाश्रयाः ।
SP0050032 सर्वक्रियाः प्रकुर्वाणास्तमेव मनसा गताः ॥
SP0050041 तेषां तं भावमालक्ष्य मातरिश्वा महातपाः ।
SP0050042 सर्वप्राणिचरः श्रीमान्सर्वभूतप्रवर्तकः ।
SP0050043 ददौ स रूपी भगवान्दर्शनं सत्त्रिणां शुभः ॥
SP0050051 तं ते दृष्ट्वार्चयित्वा च मातरिश्वानमव्ययम् ।
SP0050052 आसीनमासने पुण्ये ऋषयः संशितव्रताः ।
SP0050053 पप्रच्छुरुद्भवं कृत्स्नं जगतः प्रलयं तथा ॥
SP0050061 स्थितिं च कृत्स्नां वंशांश्च युगमन्वन्तराणि च ।
SP0050062 वंशानुचरितं कृत्स्नं दिव्यमानं तथैव च ॥
SP0050071 अष्टानां देवयोनीनामुत्पत्तिं प्रलयं तथा ।
SP0050072 पितृसर्गं तथाशेषं ब्रह्मणो मानमेव च ॥
SP0050081 चन्द्रादित्यगतिं सर्वां ताराग्रहगतिं तथा ।
SP0050082 स्थितिं सर्वेश्वराणां च द्वीपधर्ममशेषतः ।
SP0050083 वर्णाश्रमव्यवस्थानं यज्ञानां च प्रवर्तनम् ॥
SP0050091 एतत्सर्वमशेषेण कथयामास स प्रभुः ।
SP0050092 दिव्यं वर्षसहस्रं च तेषां तदभियात्तथा ॥
SP0050101 अथ दिव्येन रूपेण सामवाग्दिशिण्नरीक्षणा ।
SP0050102 यजुर्घ्राणाथर्वशिराः शब्दजिह्वा शुभा सती ॥
SP0050111 न्यायश्रोत्रा निरुक्तत्वगृक्पादपदगामिनी ।
SP0050112 कालबाहूर्वर्षकरा दिवसाश्ण्गुलिधारिणी ॥
SP0050121 कलादिभिः पर्वभिश्च मासैः कररुहैस्तथा ।
SP0050122 कल्पसाधारणा दिव्या शिक्षाविद्योन्नतस्तनी ॥
SP0050131 छन्दोविचितिमध्या च मीमांसानाभिरेव च ।
SP0050132 पुराणविस्तीर्णकटिर्धर्मशास्त्रमनोरथा ॥
SP0050141 आश्रमोरूर्वर्णजानुर्यज्ञगुल्फा फलाश्ण्गुलिः ।
SP0050142 लोकवेदशरीरा च रोमभिश्छान्दसैः शुभैः ॥
SP0050151 श्रद्धाशुभाचारवस्त्रा योगधर्माभिभाषिणी ।
SP0050152 वेदीमध्याद्विनिःसृत्य प्रवृत्ता परमाम्भसा ॥

SP0050161 तस्यान्तेऽवभृथे प्लुत्य वायुना सह संगताः ।
SP0050162 तामपृच्छन्त का न्वेषा वायुं देवं महाधियम् ॥
SP0050171 उवाच स महातेजा ऋषीन्धर्मानुभावितान् ।
SP0050172 शुद्धाः स्थ तपसा सर्वे महान्धर्मश्च वः कृतः ॥
SP0050181 यस्मादियं नदी पुण्या ब्रह्मलोकादिहागता ।
SP0050182 इयं सरस्वती नाम ब्रह्मलोकविभूषणा ॥
SP0050191 प्रथमं मर्त्यलोकेऽस्मिन्युष्मत्सिद्ध्यर्थमागता ।
SP0050192 नास्याः पुण्यतमा काचित्त्रिषु लोकेषु विद्यते ॥
SP0050200 ऋषय ऊचुः ।
SP0050201 कथमेषा महापुण्या प्रवृत्ता ब्रह्मलोकगा ।
SP0050202 कारणं किं च तत्रासीदेतदिच्छाम वेदितुम् ॥
SP0050210 वायुरुवाच ।
SP0050211 अत्र वो वर्तयिष्यामि इतिहासं पुरातनम् ।
SP0050212 ब्रह्मणश्चैव संवादं पुरा यज्ञस्य चैव ह ॥
SP0050221 यज्ञैरिष्ट्वा पुरा देवो ब्रह्मा दीप्तेन तेजसा ।
SP0050222 असृजत्सर्वभूतानि स्थावराणि चराणि च ॥
SP0050231 स दृष्ट्वा दीप्तिमान्देवो दीप्त्या परमया युतः ।
SP0050232 अवेक्षमाणः स्वा/ल्लोकांश्चतुर्भिर्मुखपशण्कजैः ॥
SP0050241 देवादीन्मनुष्यादींश्च दृष्ट्वा दृष्ट्वा महामनाः ।
SP0050242 अमन्यत न मेऽन्योऽस्ति समो लोके न चाधिकः ॥
SP0050251 योऽहमेताः प्रजाः सर्वाः सप्तलोकप्रतिष्ठिताः ।
SP0050252 देवमानुषतिर्यक्षु ग्रसामि विसृजामि च ॥
SP0050261 अहं स्रष्टा हि भूतानां नान्यः कश्चन विद्यते ।
SP0050262 नियन्ता लोककर्ता च न मयास्ति समः क्वचित् ॥
SP0050271 तस्यैवं मन्यमानस्य यज्ञ आगान्महामनाः ।
SP0050272 उवाच चैनं दीप्तात्मा मैवं मंस्था महामते ।
SP0050273 अयं हि तव संमोहो विनाशाय भविष्यति ॥
SP0050281 न युक्तमीदृशं तेऽद्य सत्त्वस्थस्यात्मयोनिनः ।
SP0050282 स्रष्टा त्वं चैव नान्योऽस्ति तथापि न यशस्करम् ॥
SP0050291 अहं कर्ता हि भूतानां भुवनस्य तथैव च ।
SP0050292 करोमि न च संमोहं यथा त्वं देव कत्थसे ॥
SP0050301 तमुवाच तदा ब्रह्मा न त्वं धारयिता विभो ।
SP0050302 अहमेव हि भूतानां धर्ता भर्ता तथैव च ।
SP0050303 मया सृष्टानि भूतानि त्वमेवात्र विमुह्यसे ॥
SP0050311 अथागात्तत्र संविग्नो वेदः परमदीप्तिमान् ।
SP0050312 उवाच चैव तौ वेदो नैतदेवमिति प्रभुः ॥

SP0050321 अहं श्रेष्ठो महाभागौ न वदाम्यनृतं क्वचित् ।
SP0050322 शृणुध्वं मम यः कर्ता भूतानां युवयोश्च ह ॥
SP0050331 परमेशो महादेवो रुद्रः सर्वगतः प्रभुः ।
SP0050332 येनाहं तव दत्तश्च कृतस्त्वं च प्रजापतिः ॥
SP0050341 यज्ञोऽयं यत्प्रसूतिश्च अण्डं यत्रास्ति संस्थितम् ।
SP0050342 सर्वं तस्मात्प्रसूतं वै नान्यः कर्तास्ति नः क्वचित् ॥
SP0050351 तमेवंवादिनं देवो ब्रह्मा वेदमभाषत ।
SP0050352 अहं श्रुतीनां सर्वासां नेता स्रष्टा तथैव च ॥
SP0050361 मत्प्रसादाद्धि वेदस्त्वं यज्ञश्चायं न संशयः ।
SP0050362 मूढौ युवामधर्मो वा भवद्भ्यामन्यथा कृतः ।
SP0050363 प्रायश्चित्तं चरध्वं वः किल्बिषान्मोक्ष्यथस्ततः ॥
SP0050371 एवमुक्ते तदा तेन महाञ्छब्दो बभूव ह ।
SP0050372 आदित्यमण्डलाकारमदृश्यत च मण्डलम् ।
SP0050373 महच्छब्देन महता उपरिष्टाद्वियत्स्थितम् ॥
SP0050381 स चापि तस्माद्विभ्रष्टो भूतलं समुपाश्रितः ।
SP0050382 हिमवत्कुञ्जमासाद्य नानाविहगनादितम् ।
SP0050383 व्योमगश्च चिरं भूत्वा भूमिगः सम्बभूव ह ॥
SP0050391 ततो ब्रह्मा दिशः सर्वा निरीक्ष्य मुखपङ्कजैः ।
SP0050392 चतुर्भिर्न वियत्स्थं तमपश्यत्स पितामहः ॥
SP0050401 स मुखं पञ्चमं दीप्तमसृजन्मूर्ध्नि संस्थितम् ।
SP0050402 तेनापश्यद्वियत्स्थं तं सूर्यायुतसमप्रभम् ।
SP0050403 आदित्यमण्डलाकारं शब्दवद्घोरदर्शनम् ॥
SP0050411 तं दृष्ट्वा पञ्चमं तस्य शिरो वै क्रोधजं महत् ।
SP0050412 संवर्तकाग्निसदृशं ग्रसिष्यत्तमवर्धत ॥
SP0050421 वर्धमानं तदा तत्तु वडवामुखसंनिभम् ।
SP0050422 दीप्तिमच्छब्दवच्चैव देवोऽसौ दीप्तमण्डलः ॥
SP0050431 हस्ताङ्गुष्ठनखेनाशु वामेनावज्ञयैव हि ।
SP0050432 चकर्त तन्महद्घोरं ब्रह्मणः पञ्चमं शिरः ॥
SP0050441 दीप्तिकृत्तशिराः सोऽथ दुःखेनोस्रेण चार्दितः ।
SP0050442 पपात मूढचेता वै योगधर्मविवर्जितः ॥
SP0050451 ततः सुप्तोत्थित इव संज्ञां लब्ध्वा महातपाः ।
SP0050452 मण्डलस्थं महादेवमस्तौषीद्दीनया गिरा ॥
SP0050460 ब्रह्मोवाच ।
SP0050461 नमः सहस्रनेत्राय शतनेत्राय वै नमः ।
SP0050462 नमो विवृतवक्त्राय शतवक्त्राय वै नमः ॥
SP0050471 नमः सहस्रवक्त्राय सर्ववक्त्राय वै नमः ।

SP0050472 नमः सहस्रपादाय सर्वपादाय वै नमः ॥
SP0050481 सहस्रपाणये चैव सर्वतःपाणये नमः ।
SP0050482 नमः सर्वस्य स्रष्ट्रे च द्रष्ट्रे सर्वस्य ते नमः ॥
SP0050491 आदित्यवर्णाय नमः शिरसश्छेदनाय च ।
SP0050492 सृष्टिप्रलयकर्त्रे च स्थितिकर्त्रे तथा नमः ॥
SP0050501 नमः सहस्रलिङ्गाय सहस्रचरणाय च ।
SP0050502 संहारलिङ्गिने चैव जललिङ्गाय वै नमः ॥
SP0050511 अन्तश्चराय सर्वाय प्रकृतेः प्रेरणाय च ।
SP0050512 व्यापिने सर्वसत्त्वानां पुरुषप्रेरकाय च ॥
SP0050521 इन्द्रियार्थविशेषाय तथा नियमकारिणे ।
SP0050522 भूतभव्याय शर्वाय नित्यं सत्त्ववदाय च ॥
SP0050531 त्वमेव स्रष्टा लोकानां मन्ता दाता तथा विभो ।
SP0050532 शरणागताय दान्ताय प्रसादं कर्तुमर्हसि ॥
SP0050541 तस्यैवं स्तुवतः सम्यग्भावेन परमेण ह ।
SP0050542 स तस्मै देवदेवेशो दिव्यं चक्षुरदात्तदा ॥
SP0050551 चक्षुषा तेन स तदा ब्रह्मा लोकपितामहः ।
SP0050552 विमाने सूर्यसंकाशे तेजोराशिमपश्यत ॥
SP0050561 तस्य मध्यात्ततो वाचं महतीं समशृण्वत ।
SP0050562 गम्भीरां मधुरां युक्तामथ सम्पन्नलक्षणाम् ।
SP0050563 विशदां पुत्र पुत्रेति पूर्वं देवेन चोदिताम् ॥
SP0050571 संस्वेदात्पुत्र उत्पन्नो यत्तुभ्यं नीललोहितः ।
SP0050572 यच्च पूर्वं मया प्रोक्तस्त्वं तदा सुतमार्गणे ॥
SP0050581 मदीयो गणपो यस्ते मन्मूर्तिश्च भविष्यति ।
SP0050582 स प्राप्य परमं ज्ञानं मूढ त्वा विनयिष्यति ॥
SP0050591 तस्येयं फलनिष्पत्तिः शिरसश्छेदनं तव ।
SP0050592 मयैव कारिता तेन निर्वृतश्चाधुना भव ॥
SP0050601 तस्य चैवोत्पथस्थस्य यज्ञस्य तु महामते ।
SP0050602 शिरश्छेत्स्यत्यसावेव कस्मिंश्चित्कारणान्तरे ।
SP0050603 स्तवेनानेन तुष्टोऽस्मि किं ददानि च तेऽनघ ॥
SP0050611 वायुरुवाच ।
SP0050612 ततः स भगवान्हृष्टः प्रणम्य शुभया गिरा ।
SP0050613 उवाच प्राञ्जलिर्भूत्वा लक्ष्यालक्ष्यं तमीश्वरम् ॥
SP0050621 भगवन्नैव मे दुःखं दर्शनात्ते प्रबाधते ।
SP0050622 इच्छामि शिरसो ह्यस्य धारणं सर्वदा त्वया ।
SP0050623 ननु स्मरेयमेतच्च शिरसश्छेदनं विभो ॥
SP0050631 भूयश्चाधर्मकार्येभ्यस्त्वयैवेच्छे निवारणम् ।

SP0050632 तथा च कृत्यमुद्दिश्य पश्येयं त्वा यथासुखम् ॥
SP0050641 विज्ञप्तिं ब्रह्मणः श्रुत्वा प्रोवाच भुवनेश्वरः ।
SP0050642 स एव सुतसंज्ञस्ते मन्मूर्तिर्नीललोहितः ।
SP0050643 शिरश्छेत्स्यति यज्ञस्य बिभत्स्र्यति शिरश्च ते ॥
SP0050651 इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयत ।
SP0050652 गते तस्मिन्महादेवे ब्रह्मा लोकपितामहः ।
SP0050653 सयज्ञः सहवेदश्च स्वं लोकं प्रत्यपद्यत ॥
SP0050661 वायुरुवाच ।
SP0050662 य इमं शृणुयान्मर्त्यो गुह्यं वेदार्थसंमितम् ।
SP0050663 स देहभेदमासाद्य सायुज्यं ब्रह्मणो व्रजेत् ॥
SP0050671 यश्चेमं पठते नित्यं ब्राह्मणानां समीपतः ।
SP0050672 स सर्वपापनिर्मुक्तो रुद्रलोके महीयते ॥
SP0050681 नापुत्रशिष्ययोगिभ्य इदमाख्यानमैश्वरम् ।
SP0050682 आख्येयं नापि चाज्ञाय न शठाय न मानिने ॥
SP0050691 इदं महद्दिव्यमधर्मशासनं पठेत्सदा ब्राह्मणवैद्यसंसदि ।
SP0050692 कृतावकाशो भवतीह मानवः शरीरभेदे प्रविशेत्पितामहम् ॥
SP0059999 इति स्कन्दपुराणे पञ्चमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय ६

SP0060010 सनत्कुमार उवाच ।
SP0060011 ततः स भगवान्देवः कपर्दी नीललोहितः ।
SP0060012 आज्ञया परमेशस्य जग्राह ब्रह्मणः शिरः ॥
SP0060021 तद्गृहीत्वा शिरो दीप्तं रूपं विकृतमास्थितः ।
SP0060022 योगक्रीडां समास्थाय भैक्षाय प्रचचार ह ॥
SP0060031 स देववेश्मनि तदा भिक्षार्थमगमद्द्विजाः ।
SP0060032 न चास्य कश्चित्तां भिक्षामनुरूपामदाद्विभोः ॥
SP0060041 अभ्यगात्संक्रमेणैव वेश्म विष्णोर्महात्मनः ।
SP0060042 तस्यातिष्ठत स द्वारि भिक्षामुच्चारयञ्छुभाम् ॥
SP0060051 स दृष्ट्वा तदुपस्थं तु विष्णुर्वै योगचक्षुषा ।
SP0060052 शिरां ललाटात्सम्भिद्य रक्तधारामपातयत् ।
SP0060053 पपात सा च विस्तीर्णा योजनार्धशतं तदा ॥
SP0060061 तया पतन्त्या विप्रेन्द्रा बहून्यब्दानि धारया ।
SP0060062 पितामहकपालस्य नार्धमप्यभिपूरितम् ।
SP0060063 तमुवाच ततो देवः प्रहस्य वचनं शुभम् ॥
SP0060071 सकृत्कन्याः प्रदीयन्ते सकृदग्निश्च जायते ।
SP0060072 सकृद्राजानो ब्रुवते सकृद्भिक्षा प्रदीयते ॥

SP0060081 तुष्टोऽस्मि तव दानेन युक्तेनानेन मानद ।
SP0060082 वरं वरय भद्रं ते वरदोऽस्मि तवाद्य वै ॥
SP0060091 विष्णुरुवाच ।
SP0060092 एष एव वरः श्लाघ्यो यदहं देवताधिपम् ।
SP0060093 पश्यामि शंकरं देवमुग्रं शर्वं कपर्दिनम् ॥
SP0060101 देवश्छायां ततो वीक्ष्य कपालस्थे तदा रसे ।
SP0060102 ससर्ज पुरुषं दीप्तं विष्णोः सदृशमूर्जितम् ॥
SP0060111 तमाहाथाक्षयश्चासि अजरामर एव च ।
SP0060112 युद्धेषु चाप्रतिद्वन्द्वी सखा विष्णोरनुत्तमः ।
SP0060113 देवकार्यकरः श्रीमान्सहानेन चरस्व च ॥
SP0060121 नारासु जन्म यस्मात्ते विष्णुदेहोद्भवासु च ।
SP0060122 नरस्तस्माद्धि नाम्ना त्वं प्रियश्चास्य भविष्यसि ॥
SP0060130 वायुरुवाच ।
SP0060131 तं तदाश्वास्य निक्षिप्य नरं विष्णोः स्वयं प्रभुः ।
SP0060132 अगमद्ब्रह्मसदनं तौ चाविविशतुर्गृहम् ॥
SP0060141 य इदं नरजन्मेह शृणुयाद्वा पठेत वा ।
SP0060142 स कीर्त्या परया युक्तो विष्णुलोके महीयते ॥
SP0069999 इति स्कन्दपुराणे षष्ठोऽध्यायः ॥

---

## स्कंदपुराण अध्याय ७

SP0070010 वायुरुवाच ।
SP0070011 ब्रह्मलोकं समासाद्य भगवान्सर्वलोकपः ।
SP0070012 भैक्ष्यं भैक्ष्यमिति प्रोच्य द्वारे समवतिष्ठत ॥
SP0070021 तं दृष्ट्वा विकृतं ब्रह्मा कपालकरभूषणम् ।
SP0070022 ज्ञात्वा योगेन महता तुष्टाव भुवनेश्वरम् ॥
SP0070031 तस्य तुष्टस्तदा देवो वरदोऽस्मीत्यभाषत ।
SP0070032 वृणीष्व वरमव्यग्रो यस्ते मनसि वर्तते ॥
SP0070040 ब्रह्मोवाच ।
SP0070041 इच्छामि देवदेवेश त्वया चिह्नमिदं कृतम् ।
SP0070042 येन चिह्नेन लोकोऽयं चिह्नितः स्याज्जगत्पते ॥
SP0070051 तस्य तद्वचनं श्रुत्वा भगवान्वदतां वरः ।
SP0070052 सर्वश्रुतिमयं ब्रह्म ओमिति व्याजहार ह ॥
SP0070061 शम्भोर्व्याहारमात्रेण वागियं दिव्यरूपिणी ।
SP0070062 निःसृता वदनाद्देवी प्रह्वा समवतिष्ठत ॥
SP0070071 तामुवाच तदा देवो वाचा संजीवयन्निव ।
SP0070072 यस्मात्त्वमक्षरो भूत्वा मम वाचो विनिःसृता ।

SP0070073 सर्वविद्याधिदेवी त्वं तस्माद्देवि भविष्यसि ॥
SP0070081 यस्माद्ब्रह्मसरश्चेदं मुखं मम समाश्रिता ।
SP0070082 तस्मात्सरस्वतीत्येव लोके ख्यातिं गमिष्यसि ॥
SP0070091 इमं लोकं वराम्भोभिः पावयित्वा च सुप्रभे ।
SP0070092 सर्वा/ल्लोकांस्तारयित्री पुनस्त्वं नात्र संशयः ॥
SP0070101 यज्ञभागं च देवास्ते दास्यन्ति सपितामहाः ।
SP0070102 पुण्या च सर्वसरितां भविष्यसि न संशयः ॥
SP0070111 ततः सा समनुज्ञाता शंकरेण विभाविनी ।
SP0070112 चक्रे ब्रह्मसरः पुण्यं ब्रह्मलोकेऽतिपावनम् ॥
SP0070121 तोयामृतसुसम्पूर्णं स्वर्णपद्मोपशोभितम् ।
SP0070122 नानापक्षिगणाकीर्णं मीनसंक्षोभितोदकम् ।
SP0070123 ततो विनिःसृता भूयः सेमं लोकमपावयत् ॥
SP0070131 तं गृहीत्वा महादेवः कपालममितौजसम् ।
SP0070132 इमं लोकमनुप्राप्य देशे श्रेष्ठेऽवतिष्ठत ॥
SP0070141 तत्र तच्च महद्दिव्यं कपालं देवताधिपः ।
SP0070142 स्थापयामास दीप्तार्चिर्गणानामग्रतः प्रभुः ॥
SP0070151 तत्स्थापितमथो दृष्ट्वा गणाः सर्वे महात्मनः ।
SP0070152 अनदन्सुमहानादं नादयन्तो दिशो दश ।
SP0070153 क्षुब्धार्णवाशनिप्रख्यं नभो येन व्यशीर्यत ॥
SP0070161 तेन शब्देन घोरेण असुरो देवकण्टकः ।
SP0070162 हालाहल इति ख्यातस्तं देशं सोऽभ्यगच्छत ॥
SP0070171 अमृष्यमाणः क्रोधान्धो दुरात्मा यज्ञनाशकः ।
SP0070172 ब्रह्मदत्तवरश्चैव अवध्यः सर्वजन्तुभिः ।
SP0070173 महिषश्छन्नरूपाणामसुराणां शतैर्वृतः ॥
SP0070181 तमापतन्तं सक्रोधं महिषं देवकण्टकम् ।
SP0070182 सम्प्रेक्ष्याह गणाध्यक्षो गणान्सर्वान्पिनाकिनः ॥
SP0070191 दैत्योऽयं गणपा दुष्टस्त्रैलोक्यसुरकण्टकः ।
SP0070192 आयाति त्वरितो यूयं तस्मादेनं निहन्यथ ॥
SP0070201 ततस्ते गणपाः सर्वे समायान्तं सुरद्विषम् ।
SP0070202 भित्त्वा शूलेन संक्रुद्धा विगतासुं च चक्रिरे ॥
SP0070211 हते तस्मिंस्तदा देवो दिशः सर्वा अवैक्षत ।
SP0070212 ताभ्यः पिशाचा वृत्तास्याः पिशाच्यश्च महाबलाः ।
SP0070213 अभ्यगच्छन्त देवेशं ताभ्यस्तं विनिवेदयत् ॥
SP0070221 स ताभिरुपयुक्तश्च विनियुक्तश्च सर्वशः ।
SP0070222 तमेव चाप्यथावासं देवादिष्टं प्रपेदिरे ॥
SP0070231 भक्षयन्ति स्म महिषं मित्वा मित्वा यतस्तु ताः ।

SP0070232 कपालमातरः प्रोक्तास्तस्माद्देवेन धीमता ॥
SP0070241 कपालं स्थापितं यस्मात्तस्मिन्देशे पिनाकिना ।
SP0070242 महाकपालं तत्तस्मात्त्रिषु लोकेषु गद्यते ॥
SP0070251 स्थापितस्य कपालस्य यथोक्तमभवत्तदा ।
SP0070252 ख्यातं शिवतडागं तत्सर्वपापप्रमोचनम् ॥
SP0070261 आगत्याथ ततो ब्रह्मा देवतानां गणैर्वृतः ।
SP0070262 कपर्दिनमुपामन्त्र्य तं देशं सोऽन्वगृह्णत ॥
SP0070271 अर्धयोजनविस्तीर्णं क्षेत्रमेतत्समन्ततः ।
SP0070272 भविष्यति न संदेहः सिद्धक्षेत्रं महात्मनः ॥
SP0070281 श्मेति हि प्रोच्यते पापं क्षयं शानं विदुर्बुधाः ।
SP0070282 ध्यानेन नियमैश्चैव श्मशानं तेन संज्ञितम् ।
SP0070283 गुह्यं देवातिदेवस्य परं प्रियमनुत्तमम् ॥
SP0070291 एवं तत्र नरः पापं सर्वमेव प्रहास्यति ।
SP0070292 त्रिरात्रोपोषितश्चैव अर्चयित्वा वृषध्वजम् ।
SP0070293 राजसूयाश्वमेधाभ्यां फलं यत्तदवाप्स्यति ॥
SP0070301 यश्च प्राणान्प्रियांस्तत्र परित्यक्ष्यति मानवः ।
SP0070302 स गुह्यगणदेवानां समतां समवाप्स्यति ॥
SP0070311 वायुरुवाच ।
SP0070312 ततः स तत्र संस्थाप्य देवस्यार्चाद्वयं शुभम् ।
SP0070313 शूलेश्वरं महाकायं रुद्रस्यायतनं शुभम् ॥
SP0070321 तत्राभिगमनादेव कृत्वा पापस्य संक्षयम् ।
SP0070322 रुद्रलोकमवाप्नोति स प्राहैवं पितामहः ॥
SP0070331 यत्र चापि शिरस्तस्य चिच्छेद भुवनेश्वरः ।
SP0070332 कश्मीरः सोऽभवन्नाम्ना देशः पुण्यतमः सदा ॥
SP0070341 ततो देवः सह गणै रूपं विकृतमास्थितः ।
SP0070342 पश्यतां सर्वदेवानामन्तर्धानमगात्प्रभुः ॥
SP0070351 गते च देवनाथेऽथ कपालस्थानमव्ययम् ।
SP0070352 सर्वतीर्थाभिषेकस्य फलेन समयोजयत् ॥
SP0070361 तदद्यापि महद्दिव्यं सरस्तत्र प्रदृश्यते ।
SP0070362 महाकपालं विप्रेन्द्राः स्वर्गास्तत्राक्षयाः स्मृताः ॥
SP0070371 इदं शुभं दिव्यमधर्मनाशनं महाफलं सेन्द्रसुरासुरार्चितम् ।
SP0070372 महाकपालं प्रकृतोपदर्शनं सुरेशलोकादिविगाहने हितम् ॥
SP0070381 तपोधनैः सिद्धगणैश्च संस्तुतं दिविष्ठतुल्यद्विजराजमण्डले ।
SP0070382 पठेन्नरो यः शृणुयाच्च सर्वदा त्रिपिष्टपं गच्छति सोऽभिनन्दितः ॥
SP0079999 इति स्कन्दपुराणे सप्तमोऽध्यायः ॥

SP0080010 वायुरुवाच ।
SP0080011 एवमेषा भगवती ब्रह्मलोकानुसारिणी ।
SP0080012 युष्माकं धर्मसिद्ध्यर्थं वेदीमध्याद्व्यवर्तत ॥
SP0080020 सनत्कुमार उवाच ।
SP0080021 एवं तेषां समाप्तेऽथ सत्त्रे वर्षसहस्रिके ।
SP0080022 प्रवृत्तायां सरस्वत्यामगात्तत्र पितामहः ॥
SP0080030 ब्रह्मोवाच ।
SP0080031 भूयोऽन्येन ह सत्त्रेण यजध्वं देवमीश्वरम् ।
SP0080032 यदा वो भविता विघ्नं तदा निष्कल्मषं तपः ॥
SP0080041 विघ्नं तच्चैव संतीर्य तपस्तप्त्वा च भास्वरम् ।
SP0080042 योगं प्राप्य महद्युक्तास्ततो द्रक्ष्यथ शंकरम् ॥
SP0080051 तथेत्युक्त्वा गते तस्मिन्सत्त्राण्याजह्रिरे तदा ।
SP0080052 बहूनि विविधाकाराण्यभियुक्ता महाव्रताः ॥
SP0080061 निःसोमां पृथिवीं कृत्वा कृत्स्नामेतां ततो द्विजाः ।
SP0080062 राजानं सोममानाय्य अभिषेक्तुमियेषिरे ॥
SP0080071 अथ सोऽपि कृतातिथ्यः अदृश्येन दुरात्मना ।
SP0080072 स्वर्भानुना हृतः सोमस्ततस्ते दुःखिताभवन् ॥
SP0080081 ते गत्वा मुनयः सर्वे कलापग्रामवासिनः ।
SP0080082 पुरूरवसमानीय राजानं तेऽभ्यषेचयन् ॥
SP0080091 ऊचुश्चैनं महाभागा हृतः सोमो हि नः प्रभो ।
SP0080092 केनापि तद्भवान्क्षिप्रमिहानयतु मा चिरम् ॥
SP0080101 स एवमुक्तो मृगयन्न तमासादयत्प्रभुः ।
SP0080102 उवाच स तदा विप्रान्प्रणम्य भयपीडितः ॥
SP0080111 परमं यत्नमास्थाय मया सोमोऽभिमार्गितः ।
SP0080112 न च तं वेद्मि केनासौ क्व वा नीत इति प्रभुः ॥
SP0080121 तमेवंवादिनं क्रुद्धा ऋषयः संशितव्रताः ।
SP0080122 ऊचुः सर्वे सुसंरब्धा इलापुत्रं महामतिम् ॥
SP0080131 भवान्राजा कुतस्त्राता कृतोऽस्माभिर्भयार्दितैः ।
SP0080132 न च नस्तद्भयं शक्तो विनाशयितुमाश्वपि ॥
SP0080141 विषयेष्वतिसक्तात्मा योगात्तं नानुपश्यसि ।
SP0080142 तस्माद्विरोधमास्थाय द्विजेभ्यो वधमाप्स्यसि ॥
SP0080151 वयमेव हि राजानमानयिष्याम दुर्विदम् ।
SP0080152 तपसा स्वेन राजेन्द्र पश्य नो बलमुत्तमम् ॥
SP0080161 ततस्ते ऋषयः सर्वे तपसा दग्धकिल्बिषाः ।

SP0080162 अस्तुवन्वाग्भिरिष्टाभिर्गायत्रीं वेदभाविनीम् ॥
SP0080171 स्तुवतां तु ततस्तेषां गायत्री वेदभाविनी ।
SP0080172 रूपिणी दर्शनं प्रादादुवाचेदं च तान्द्विजान् ॥
SP0080181 तुष्टास्मि वत्साः किं वोऽद्य करोमि वरदास्मि वः ।
SP0080182 ब्रूत तत्कृतमेवेह भविष्यति न संशयः ॥
SP0080190 ऋषय ऊचुः ।
SP0080191 सोमो नोऽपहृतो देवि केनापि सुदुरात्मना ।
SP0080192 तमानय नमस्तेऽस्तु एष नो वर उत्तमः ॥
SP0080200 सनत्कुमार उवाच ।
SP0080201 सा तथोक्ता विनिश्चित्य दृष्ट्वा दिव्येन चक्षुषा ।
SP0080202 श्येनीभूता जगामाशु स्वर्भानुमसुरं प्रति ॥
SP0080211 व्यग्राणामसुराणां सा गृहीत्वा सोममागता ।
SP0080212 आगम्य तानृषीन्प्राह अयं सोमोऽभिषूयताम् ॥
SP0080221 ते तमासाद्य ऋषयः प्राप्य यज्ञफलं महत् ।
SP0080222 अमन्यन्त तपोऽस्माकं निष्कल्मषमिति द्विजाः ॥
SP0080231 ततस्तत्र स्वयं ब्रह्मा सह देवोरगादिभिः ।
SP0080232 आगत्य तानृषीन्प्राह तपः कुरुत मा चिरम् ॥
SP0080241 ते सह ब्रह्मणा गत्वा मैनाकं पर्वतोत्तमम् ।
SP0080242 सर्वैर्देवगणैः सार्धं तपश्चेरुः समाहिताः ॥
SP0080251 तेषां कालेन महता तपसा भावितात्मनाम् ।
SP0080252 योगप्रवृत्तिरभवत्सूक्ष्मयुक्तास्ततस्तु ते ॥
SP0080261 ते युक्ता ब्रह्मणा सार्धमृषयः सह देवतैः ।
SP0080262 महेश्वरे मनः स्थाप्य निश्चलोपलवत्स्थिताः ॥
SP0080271 अथ तेषां महादेवः पिनाकी नीललोहितः ।
SP0080272 अभ्यगच्छत तं देशं विमानेनार्कतेजसा ॥
SP0080281 तद्भावभाविताञ्ज्ञात्वा सद्भावेन परेण ह ।
SP0080282 उवाच मेघनिर्ह्रादः शतदुन्दुभिनिस्वनः ॥
SP0080291 भो भो सब्रह्मका देवाः सविष्णुऋषिचारणाः ।
SP0080292 दिव्यं चक्षुः प्रयच्छामि पश्यध्वं मां यथेप्सितम् ॥
SP0080300 सनत्कुमार उवाच ।
SP0080301 अपश्यन्त ततः सर्वे सूर्यायुतसमप्रभम् ।
SP0080302 विमानं मेरुसंकाशं नानारत्नविभूषितं ॥
SP0080311 तस्य मध्येऽग्निकूटं च सुमहद्दीप्तिमास्थितम् ।
SP0080312 ज्वालामालापरिक्षिप्तमर्चिभिरुपशोभितम् ॥
SP0080321 दंष्ट्राकरालवदनं प्रदीप्तानललोचनम् ।
SP0080322 त्रेताग्निपिश्णगलजटं भुजगाबद्धमेखलम् ॥

SP0080331 मृष्टकुण्डलिनं चैव शूलासक्तमहाकरम् ।
SP0080332 पिनाकिनं दण्डहस्तं मुद्गराशनिपाणिनम् ॥
SP0080341 असिपट्टिसहस्तं च चक्रिणं चोर्ध्वमेहनम् ।
SP0080342 अक्षसूत्रकरं चैव दुष्प्रेक्ष्यमकृतात्मभिः ।
SP0080343 चन्द्रादित्यग्रहैश्चैव कृतस्रगुपभूषणम् ॥
SP0080351 तमपश्यन्त ते सर्वे देवा दिव्येन चक्षुषा ।
SP0080352 यं दृष्ट्वा न भवेन्मृत्युर्मर्त्यस्यापि कदाचन ॥
SP0080361 तपसा विनियोगयोगिनः प्रणमन्तो भवमिन्दुनिर्मलम् ।
SP0080362 वियतीश्वरदत्तचक्षुषः सह देवैर्मुनयो मुदान्विताः ॥
SP0080371 प्रसमीक्ष्य महासुरेशकालं मनसा चापि विचार्य दुर्विसह्यम् ।
SP0080372 प्रणमन्ति गतात्मभावचिन्ताः सह देवैर्जगदुद्भवं स्तुवन्तः ॥
SP0089999 इति स्कन्दपुराणे अष्टमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय ९

SP0090010 सनत्कुमार उवाच ।
SP0090011 ते दृष्ट्वा देवदेवेशं सर्वे सब्रह्मकाः सुराः ।
SP0090012 अस्तुवन्वाग्भिरिष्टाभिः प्रणम्य वृषवाहनम् ॥
SP0090020 पितामह उवाच ।
SP0090021 नमः शिवाय सोमाय भक्तानां भयहारिणे ।
SP0090022 नमः शूलाग्रहस्ताय कमण्डलुधराय च ॥
SP0090031 दण्डिने नीलकण्ठाय करालदशनाय च ।
SP0090032 त्रेताग्निदीप्तनेत्राय त्रिनेत्राय हराय च ॥
SP0090041 नमः पिनाकिने चैव नमोऽस्त्वशनिधारिणे ।
SP0090042 व्यालयज्ञोपवीताय कुण्डलाभरणाय च ॥
SP0090051 नमश्चक्रधरायैव व्याघ्रचर्मधराय च ।
SP0090052 कृष्णाजिनोत्तरीयाय सर्पमेखलिने तथा ॥
SP0090061 वरदात्रे च रुद्राय सरस्वतीसृजे तथा ।
SP0090062 सोमसूर्यर्क्षमालाय अक्षसूत्रकराय च ॥
SP0090071 ज्वालामालासहस्राय ऊर्ध्वलिश्णगाय वै नमः ।
SP0090072 नमः पर्वतवासाय शिरोहर्त्रे च मे पुरा ॥
SP0090081 हालाहलविनाशाय कपालवरधारिणे ।
SP0090082 विमानवरवाहाय जनकाय ममैव च ।
SP0090083 वरदाय वरिष्ठाय श्मशानरतये नमः ॥
SP0090091 नमो नरस्य कर्त्रे च स्थितिकर्त्रे नमः सदा ।
SP0090092 उत्पत्तिप्रलयानां च कर्त्रे सर्वसहाय च ॥
SP0090101 ऋषिदैवतनाथाय सर्वभूताधिपाय च ।

SP0090102 शिवः सौम्यश्च देवेश भव नो भक्तवत्सल ॥
SP0090110 सनत्कुमार उवाच ।
SP0090111 ब्रह्मण्यथैवं स्तुवति देवदेवः स लोकपः ।
SP0090112 उवाच तुष्टस्तान्देवानृषींश्च तपसैधितान् ॥
SP0090121 तुष्टोऽस्म्यनेन वः सम्यक्तपसा ऋषिदेवताः ।
SP0090122 वरं ब्रूत प्रदास्यामि सुनिश्चिन्त्य स उच्यताम् ॥
SP0090130 सनत्कुमार उवाच ।
SP0090131 अथ सर्वानभिप्रेक्ष्य संतुष्टांस्तपसैधितान् ।
SP0090132 दर्शनेनैव विप्रेन्द्र ब्रह्मा वचनमब्रवीत् ॥
SP0090140 ब्रह्मोवाच ।
SP0090141 यदि तुष्टोऽसि देवेश यदि देयो वरश्च नः ।
SP0090142 तस्माच्छिवश्च सौम्यश्च दृश्यश्चैव भवस्व नः ॥
SP0090151 सुखसंव्यवहार्यश्च नित्यं तुष्टमनास्तथा ।
SP0090152 सर्वकार्येषु च सदा हितः पथ्यश्च शंकरः ॥
SP0090161 सह देव्या ससूनुश्च सह देवगणैरपि ।
SP0090162 एष नो दीयतां देव वरो वरसहस्रद ॥
SP0090170 सनत्कुमार उवाच ।
SP0090171 एवमुक्तः स भगवान्ब्रह्मणा देवसत्तमः ।
SP0090172 स्वकं तेजो महद्दिव्यं व्यसृजत्सर्वयोगवित् ॥
SP0090181 अर्धेन तेजसः स्वस्य मुखादुल्कां ससर्ज ह ।
SP0090182 तामाह भव नारीति भगवान्विश्वरूपधृक् ॥
SP0090191 साकाशं द्यां च भूमिं च महिम्ना व्याप्य विष्ठिता ।
SP0090192 उपतस्थे च देवेशं दीप्यमाना यथा तडित् ॥
SP0090201 तामाह प्रहसन्देवो देवीं कमललोचनाम् ।
SP0090202 ब्रह्माणं देवि वरदमाराधय शुचिस्मिते ॥
SP0090211 सा तथेति प्रतिज्ञाय तपस्तप्तुं प्रचक्रमे ।
SP0090212 रुद्रश्च तानृषीनाह शृणुध्वं मम तोषणे ।
SP0090213 फलं फलवतां श्रेष्ठा यद्ब्रवीमि तपोधनाः ॥
SP0090221 अमरा जरया त्यक्ता अरोगा जन्मवर्जिताः ।
SP0090222 मद्भक्तास्तपसा युक्ता इहैव च निवत्स्यथ ॥
SP0090231 अयं चैवाश्रमः श्रेष्ठः स्वर्णशृश्णगोऽचलोत्तमः ।
SP0090232 पुण्यं पवित्रं स्थानं वै भविष्यति न संशयः ॥
SP0090241 मैनाके पर्वते श्रेष्ठे स्वर्णोऽहमभवं यतः ।
SP0090242 स्वर्णाक्षीं चासृजं देवीं स्वर्णाक्षं तेन तत्स्मृतम् ॥
SP0090251 स्वर्णाक्षे ऋषयो यूयं षड्कुलीयास्तपोधनाः ।
SP0090252 निवत्स्यथ मयाज्ञप्ताः स्वर्णाक्षं वै ततश्च ह ।

SP0090253 समन्ताद्योजनं क्षेत्रं पवित्रं तन्न संशयः ॥
SP0090261 देवगन्धर्वचरितमप्सरोगणसेवितम् ।
SP0090262 सिंहेभशरभाकीर्णं शार्दूलर्क्षमृगाकुलम् ।
SP0090263 अनेकविहगाकीर्णं लतावृक्षक्षुपाकुलम् ॥
SP0090271 ब्रह्मचारी नियमवाञ्जितक्रोधो जितेन्द्रियः ।
SP0090272 उपोष्य त्रिगुणां रात्रिं चरुं कृत्वा निवेद्य च ।
SP0090273 यत्र तत्र मृतः सोऽपि ब्रह्मलोके निवत्स्यति ॥
SP0090281 योऽप्येवमेव कामात्मा पश्येत्तत्र वृषध्वजम् ।
SP0090282 गोसहस्रफलं सोऽपि मत्प्रसादादवाप्स्यति ।
SP0090283 नियमेन मृतश्चात्र मया सह चरिष्यति ॥
SP0090291 यावत्स्थास्यन्ति लोकाश्च मैनाकश्चाप्ययं गिरिः ।
SP0090292 तावत्सह मया देवा मत्प्रसादाच्चरिष्यथ ॥
SP0090301 एवं स तानृषीनुक्त्वा दृष्ट्वा सौम्येन चक्षुषा ।
SP0090302 पश्यतामेव सर्वेषां तत्रैवान्तरधीयत ॥
SP0090310 सनत्कुमार उवाच ।
SP0090311 य इमं शृणुयान्मर्त्यो द्विजातीञ्छ्रावयेत वा ।
SP0090312 सोऽपि तत्फलमासाद्य चरेन्मृत्युविवर्जितः ॥
SP0090321 जयति जलदवाहः सर्वभूतान्तकालः शमदमनियतानां क्लेशहर्ता यतीनाम् ।
SP0090322 जननमरणहर्ता चेष्टतां धार्मिकाणां विविधकरणयुक्तः खेचरः पादचारी ॥
SP0090331 मदनपुरविदारी नेत्रदन्तावपाती विगतभयविषादः सर्वभूतप्रचेताः ।
SP0090332 सततमभिदधानश्चेकितानात्मचित्तः करचरणललामः सर्वदृग्देवदेवः ॥
SP0099999 इति स्कन्दपुराणे नवमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय १०

SP0100010 सनत्कुमार उवाच ।
SP0100011 सा देवी त्र्यम्बकप्रोक्ता ततापं सुचिरं तपः ।
SP0100012 निराहारा कदाचिच्च एकपर्णाशना पुनः ।
SP0100013 वाय्वाहारा पुनश्चापि अब्भक्षा भूय एव च ॥
SP0100021 तां तपश्चरणे युक्तां ब्रह्मा ज्ञात्वातिभास्वराम् ।
SP0100022 उवाच ब्रूहि तुष्टोऽस्मि देवि किं करवाणि ते ॥
SP0100031 साब्रवीत् त्र्यम्बकं देवं पतिं प्राप्येन्दुवर्चसम् ।
SP0100032 विचरेयं सुखं देव सर्वा/ल्लोकान्नमस्तव ॥
SP0100040 ब्रह्मोवाच ।
SP0100041 न हि येन शरीरेण क्रियते परमं तपः ।
SP0100042 तेनैव परमेशोऽसौ पतिः शम्भुरवाप्यते ॥
SP0100051 तस्माद्धि योगाद्भवती दक्षस्येह प्रजापतेः ।

SP0100052 जायस्व दुहिता भूत्वा पतिं रुद्रमवाप्स्यसि ॥
SP0100061 ततः सा तद्वचः श्रुत्वा योगाद्देवी मनस्विनी ।
SP0100062 दक्षस्य दुहिता जज्ञे सती नामातियोगिनी ॥
SP0100071 तां दक्षस्त्र्यम्बकायैव ददौ भार्यामनिन्दिताम् ।
SP0100072 ब्रह्मणो वचनाद्यस्यां मानसानसृजत्सुतान् ॥
SP0100081 आत्मतुल्यबलान्दीप्ताञ्जरामरणवर्जितान् ।
SP0100082 अनेकानि सहस्राणि रुद्राणाममितौजसाम् ॥
SP0100091 तान्दृष्ट्वा सृज्यमानांश्च ब्रह्मा तं प्रत्यषेधयत् ।
SP0100092 मा स्राक्षीर्देवदेवेश प्रजा मृत्युविवर्जिताः ॥
SP0100101 अन्याः सृजस्व भद्रं ते प्रजा मृत्युसमन्विताः ।
SP0100102 तेन चोक्तं स्थितोऽस्मीति स्थाणुस्तेन ततः स्मृतः ॥
SP0100110 देव उवाच ।
SP0100111 न स्रक्ष्ये मृत्युसंयुक्ताः प्रजा ब्रह्मन्कथंचन ।
SP0100112 स्थितोऽस्मि वचनात्तेऽद्य वक्तव्यो नास्मि ते पुनः ॥
SP0100121 ये त्विमे मानसाः सृष्टा महात्मानो महाबलाः ।
SP0100122 चरिष्यन्ति मया सार्धं सर्व एते हि याज्ञिकाः ॥
SP0100130 सनत्कुमार उवाच ।
SP0100131 अथ काले गते व्यास स दक्षः शापकारणात् ।
SP0100132 अन्यानाहूय जामात्ॄन्सदारानर्चयद्गृहे ॥
SP0100141 सतीं सह त्र्यम्बकेन नाजुहाव रुषान्वितः ।
SP0100142 सती ज्ञात्वा तु तत्सर्वं गत्वा पितरमब्रवीत् ॥
SP0100151 अहं ज्येष्ठा वरिष्ठा च जामात्रा सह सुव्रत ।
SP0100152 मां हित्वा नार्हसे ह्येताः सह भर्तृभिरर्चितुम् ॥
SP0100161 क्रोधेनाथ समाविष्टः स क्रोधोपहतेन्द्रियः ।
SP0100162 निरीक्ष्य प्राब्रवीद्दक्षश्चक्षुषा निर्दहन्निव ॥
SP0100171 मामेताः सति सस्नेहाः पूजयन्ति सभर्तृकाः ।
SP0100172 न त्वं तथा पूजयसे सह भर्त्रा महाव्रते ॥
SP0100181 गृहांश्च मे सपत्नीकाः प्रविशन्ति तपोधनाः ।
SP0100182 श्रेष्ठांस्तस्मात्सदा मन्ये ततस्तानर्चयाम्यहम् ॥
SP0100191 तस्माद्यत्ते करोम्यद्य शुभं वा यदि वाशुभम् ।
SP0100192 पूजां गृहाण तां पुत्रि गच्छ वा यत्र रोचते ॥
SP0100200 सनत्कुमार उवाच ।
SP0100201 ततः सा क्रोधदीप्तास्या न जग्राहातिकोपिता ।
SP0100202 पूजामसंमतां हीनामिदं चोवाच तं शुभा ॥
SP0100211 यस्मादसंमतामेतां पूजां त्वं कुरुषे मयि ।
SP0100212 श्लाघ्यां चैवाप्यदुष्टां च श्रेष्ठां मां गर्हसे पितः ॥

SP0100221 तस्मादिमं स्वकं देहं त्यजाम्येषा तवात्मजा ।
SP0100222 असत्कृतायाः किं मेऽद्य जीवितेनाशुभेन ह ॥
SP0100230 सनत्कुमार उवाच ।
SP0100231 ततः कृत्वा नमस्कारं मनसा त्र्यम्बकाय ह ।
SP0100232 उवाचेदं सुसंरब्धा वचनं वचनारणिः ॥
SP0100241 यत्राहमुपपद्येयं पुनर्देहे स्वयेच्छया ।
SP0100242 एवं तत्राप्यसंमूढा सम्भूता धार्मिका सती ।
SP0100243 गच्छेयं धर्मपत्नीत्वं त्र्यम्बकस्यैव धीमतः ॥
SP0100251 ततः सा धारणां कृत्वा आग्नेयीं सहसा सती ।
SP0100252 ददाह वै स्वकं देहं स्वसमुत्थेन वह्निना ॥
SP0100261 तां ज्ञात्वा त्र्यम्बको देवीं तथाभूतां महायशाः ।
SP0100262 उवाच दक्षं संगम्य इदं वचनकोविदः ॥
SP0100271 यस्मात्ते निन्दितश्चाहं प्रशस्ताश्चेतरे पृथक् ।
SP0100272 जामातरः सपत्नीकास्तस्माद्वैवस्वतेऽन्तरे ।
SP0100273 उत्पत्स्यन्ते पुनर्यज्ञे तव जामातरस्त्विमे ॥
SP0100281 त्वं चैव मम शापेन क्षत्रियो भविता नृपः ।
SP0100282 प्रचेतसां सुतश्चैव कन्यायां शाखिनां पुनः ।
SP0100283 धर्मविघ्नं च ते तत्र करिष्ये क्रूरकर्मणः ॥
SP0100290 सनत्कुमार उवाच ।
SP0100291 तमुवाच तदा दक्षो दूयता हृदयेन वै ।
SP0100292 मया यदि सुता स्वा वै प्रोक्ता त्यक्तापि वा पुनः ।
SP0100293 किं तवात्र कृतं देव अहं तस्याः प्रभुः सदा ॥
SP0100301 यस्मात्त्वं मामभ्यशपस्तस्मात्त्वमपि शंकर ।
SP0100302 भूर्लोके वत्स्यसे नित्यं न स्वर्लोके कदाचन ॥
SP0100311 भागं च तव यज्ञेषु दत्त्वा सर्वे द्विजातयः ।
SP0100312 अपः स्प्रक्ष्यन्ति सर्वत्र महादेव महाद्युते ॥
SP0100320 सनत्कुमार उवाच ।
SP0100321 ततः स देवः प्रहसंस्तमुवाच त्रिलोचनः ।
SP0100322 सर्वेषामेव लोकानां मूलं भूर्लोक उच्यते ॥
SP0100331 तमहं धारयाम्येको लोकानां हितकाम्यया ।
SP0100332 भूर्लोके हि धृते लोकाः सर्वे तिष्ठन्ति शाश्वताः ।
SP0100333 तस्मात्तिष्ठाम्यहं नित्यमिहैव न तवाज्ञया ॥
SP0100341 भागान्दत्त्वा तथान्येभ्यो दित्सवो मे द्विजातयः ।
SP0100342 अपः स्पृशन्ति शुद्ध्यर्थं भागं यच्छन्ति मे ततः ।
SP0100343 दत्त्वा स्पृशन्ति भूयश्च धर्मस्यैवाभिवृद्धये ॥
SP0100351 यथा हि देवनिर्माल्यं शुचयो धारयन्त्युत ।

SP0100352 अशुचिं स्प्रष्टुकामाश्च त्यक्त्वापः संस्पृशन्ति च ॥
SP0100361 देवानामेवमन्येषां दित्सवो ब्राह्मणर्षभाः ।
SP0100362 भागानपः स्पृशन्ति स्म तत्र का परिदेवना ॥
SP0100371 त्वं तु मच्छापनिर्दग्धो विपरीतो नराधमः ।
SP0100372 स्वस्यां सुतायां मूढात्मा पुत्रमुत्पादयिष्यसि ॥
SP0100380 सनत्कुमार उवाच ।
SP0100381 एवं स भगवाञ्छप्त्वा दक्षं देवो जगत्पतिः ।
SP0100382 विरराम महातेजा जगाम च यथागतम् ॥
SP0100391 चन्द्रदिवाकरवह्निसमाक्षं चन्द्रनिभाननपद्मदलाक्षम् ।
SP0100392 गोवृषवाहममेयगुणौघं सततमिहेन्दुवहं प्रणताः स्मः ॥
SP0100401 य इमं दक्षशापाशण्कं देव्याश्चैवाशरीरताम् ।
SP0100402 शृणुयाद्वाथ विप्रान्वा श्रावयीत यतव्रतः ।
SP0100403 सर्वपापविनिर्मुक्तो रुद्रलोकमवाप्नुयात् ॥
SP0109999 इति स्कन्दपुराणे दशमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय ११

SP0110010 सनत्कुमार उवाच ।
SP0110011 कदाचित्स्वगृहं प्राप्तं कश्यपं द्विपदां वरम् ।
SP0110012 अपृच्छद्धिमवान्प्रश्नं लोके ख्यातिकरं नु किम् ॥
SP0110021 केनाक्षयाश्च लोकाः स्युः ख्यातिश्च परमा मुने ।
SP0110022 तथैव चार्चनीयत्वं सत्सु तं कथयस्व मे ॥
SP0110030 कश्यप उवाच ।
SP0110031 अपत्येन महाबाहो सर्वमेतदवाप्यते ।
SP0110032 मम ख्यातिरपत्येन ब्रह्मणो ऋषिभिश्च ह ॥
SP0110041 किं न पश्यसि शैलेन्द्र यतो मां परिपृच्छसि ।
SP0110042 वर्तयिष्यामि तच्चापि यन्मे दृष्टं पुराचल ॥
SP0110051 वाराणसीमहं गच्छन्नपश्यं संस्थितं दिवि ।
SP0110052 विमानं स्वनवद्दिव्यमनौपम्यमनिन्दितम् ॥
SP0110061 तस्याधस्तादार्तनादं गर्तास्थाने शृणोम्यहम् ।
SP0110062 तानहं तपसा ज्ञात्वा तत्रैवान्तर्हितः स्थितः ॥
SP0110071 अथागात्तत्र शैलेन्द्र विप्रो नियमवाञ्छुचिः ।
SP0110072 तीर्थाभिषेकपूतात्मा परे तपसि संस्थितः ॥
SP0110081 अथ स व्रजमानस्तु व्याघ्रेणाभीषितो द्विजः ।
SP0110082 विवेश तं तदा देशं सा गर्ता यत्र भूधर ॥
SP0110091 गर्तायां वीरणस्तम्बे लम्बमानांस्तदा मुनीन् ।
SP0110092 अपश्यदार्तो दुःखार्तानपृच्छत्तांश्च स द्विजः ॥

SP0110101 के यूयं वीरणस्तम्बे लम्बमाना ह्यधोमुखाः ।
SP0110102 दुःखिताः केन मोक्षश्च युष्माकं भवितानघाः ॥
SP0110110 पितर ऊचुः ।
SP0110111 वयं तेऽकृतपुण्यस्य पितरः सपितामहाः ।
SP0110112 प्रपितामहाश्च क्लिश्यामस्तव दुष्टेन कर्मणा ॥
SP0110121 नरकोऽयं महाभाग गर्तारूपं समास्थितः ।
SP0110122 त्वं चापि वीरणस्तम्बस्त्वयि लम्बामहे वयम् ॥
SP0110131 यावत्त्वं जीवसे विप्र तावदेव वयं स्थिताः ।
SP0110132 मृते त्वयि गमिष्यामो नरकं पापचेतसः ॥
SP0110141 यदि त्वं दारसंयोगं कृत्वापत्यं गुणोत्तरम् ।
SP0110142 उत्पादयसि तेनास्मान्मुच्येम वयमेकशः ॥
SP0110151 नान्येन तपसा पुत्र न तीर्थानां फलेन च ।
SP0110152 तत्कुरुष्व महाबुद्धे तारयस्व पित्न्भयात् ॥
SP0110161 स तथेति प्रतिज्ञाय आराध्य च वृषध्वजम् ।
SP0110162 पित्न्गर्तात्समुद्धृत्य गणपान्प्रचकार ह ॥
SP0110171 स्वयं च रुद्रदयितः सुकेशो नाम नामतः ।
SP0110172 संमतो बलवांश्चैव रुद्रस्य गणपोऽभवत् ॥
SP0110181 तस्मात्कृत्वा तपो घोरमपत्यं गुणवत्तरम् ।
SP0110182 उत्पादयस्व शैलेन्द्र ततः कीर्तिमवाप्स्यसि ॥
SP0110190 सनत्कुमार उवाच ।
SP0110191 स एवमुक्तो ऋषिणा शैलेन्द्रो नियमे स्थितः ।
SP0110192 तपश्चकार विपुलं येन ब्रह्मा तुतोष ह ॥
SP0110201 तमागत्य तदा ब्रह्मा वरदोऽस्मीत्यभाषत ।
SP0110202 ब्रूहि तुष्टोऽस्मि ते शैल तपसानेन सुव्रत ॥
SP0110210 हिमवानुवाच ।
SP0110211 भगवन्पुत्रमिच्छामि गुणैः सर्वैरलंकृतम् ।
SP0110212 एतद्वरं प्रयच्छस्व यदि तुष्टोऽसि नः प्रभो ॥
SP0110220 ब्रह्मोवाच ।
SP0110221 कन्या भवित्री शैलेन्द्र सुता ते वरवर्णिनी ।
SP0110222 यस्याः प्रभावात्सर्वत्र कीर्तिमाप्स्यसि पुष्कलाम् ॥
SP0110231 अर्चितः सर्वदेवानां तीर्थकोटीसमावृतः ।
SP0110232 पावनश्चैव पुण्यश्च देवानामपि सर्वतः ।
SP0110233 ज्येष्ठा च सा भवित्री ते अन्ये चानु ततः शुभे ॥
SP0110240 सनत्कुमार उवाच ।
SP0110241 एवमुक्त्वा ततो ब्रह्मा तत्रैवान्तरधीयत ।
SP0110242 सोऽपि कालेन शैलेन्द्रो मेनायामुपपादयत् ।

SP0110243 अपर्णामेकपर्णां च तथा चाप्येकपाटलाम् ॥
SP0110251 न्यग्रोधमेकपर्णा तु पाटलं चैकपाटला ।
SP0110252 आश्रिते द्वे अपर्णा तु अनिकेता तपोऽचरत् ।
SP0110253 शतं वर्षसहस्राणां दुश्चरं देवदानवैः ॥
SP0110261 आहारमेकपर्णेन सैकपर्णा समाचरत् ।
SP0110262 पाटलेन तथैकेन विदधात्येकपाटला ॥
SP0110271 पूर्णे पूर्णे सहस्रे तु आहारं तेन चक्रतुः ।
SP0110272 अपर्णा तु निराहारा तां माता प्रत्यभाषत ।
SP0110273 निषेधयन्ती ह्यु मेति मातृस्नेहेन दुःखिता ॥
SP0110281 सा तथोक्ता तदा मात्रा देवी दुश्चरचारिणी ।
SP0110282 तेनैव नाम्ना लोकेषु विख्याता सुरपूजिता ॥
SP0110291 एतत्तत्त्रिकुमारीणां जगत्स्थावरजङ्गमम् ।
SP0110292 एतासां तपसा लब्धं यावद्भूमिर्धरिष्यति ॥
SP0110301 तपःशरीरास्ताः सर्वास्तिस्रो योगबलान्विताः ।
SP0110302 सर्वाश्चैव महाभागाः सर्वाश्च स्थिरयौवनाः ॥
SP0110311 ता लोकमातरश्चैव ब्रह्मचारिण्य एव च ।
SP0110312 अनुगृह्णन्ति लोकांश्च तपसा स्वेन सर्वदा ॥
SP0110321 उमा तासां वरिष्ठा च श्रेष्ठा च वरवर्णिनी ।
SP0110322 महायोगबलोपेता महादेवमुपस्थिता ॥
SP0110331 दत्तकश्चोशना तस्याः पुत्रः स भृगुनन्दनः ।
SP0110332 असितस्यैकपर्णा तु देवलं सुषुवे सुतम् ॥
SP0110341 या तु तासां कुमारीणां तृतीया ह्येकपाटला ।
SP0110342 पुत्रं शतशलाकस्य जैगीषव्यमुपस्थिता ।
SP0110343 तस्यापि शङ्खलिखितौ स्मृतौ पुत्रावयोनिजौ ॥
SP0110351 उमा तु या मया तुभ्यं कीर्तिता वरवर्णिनी ।
SP0110352 अथ तस्यास्तपोयोगात्त्रैलोक्यमखिलं तदा ।
SP0110353 प्रधूपितं समालक्ष्य ब्रह्मा वचनमब्रवीत् ॥
SP0110360 ब्रह्मोवाच ।
SP0110361 देवि किं तपसा लोकांस्तापयस्यतिशोभने ।
SP0110362 त्वया सृष्टमिदं विश्वं मा कृत्वा तद्विनाशय ॥
SP0110371 त्वं हि धारयसे लोकानिमान्सर्वान्स्वतेजसा ।
SP0110372 ब्रूहि किं ते जगन्मातः प्रार्थितं सम्प्रसीद नः ॥
SP0110380 देव्युवाच ।
SP0110381 यदर्थं तपसो ह्यस्य चरणं मे पितामह ।
SP0110382 जानीषे तत्त्वमेतन्मे ततः पृच्छसि किं पुनः ॥
SP0110390 ब्रह्मोवाच ।

SP0110391 यदर्थं देवि तपसा श्राम्यसे लोकभावनि ।
SP0110392 स त्वां स्वयं समागम्य इहैव वरयिष्यति ॥
SP0110401 सर्वदेवपतिः श्रेष्ठः सर्वलोकेश्वरेश्वरः ।
SP0110402 वयं सदेवा यस्येशे वश्याः किंकरवादिनः ॥
SP0110411 स देवदेवः परमेश्वरेश्वरः स्वयं तवायास्यति लोकपोऽन्तिकम् ।
SP0110412 उदाररूपो विकृताभिरूपवान्समानरूपो न हि यस्य कस्यचित् ॥
SP0110421 महेश्वरः पर्वतलोकवासी चराचरेशः प्रथमोऽप्रमेयः ।
SP0110422 विनेन्दुना इन्दुसमानवक्त्रो विभीषणं रूपमिहास्थितोऽग्रम् ॥
SP0119999 इति स्कन्दपुराणे एकादशोऽध्यायः ॥

---

## स्कंदपुराण अध्याय १२

SP0120010 सनत्कुमार उवाच ।
SP0120011 ततः स भगवान्देवो ब्रह्मा तामाह सुस्वरम् ।
SP0120012 देवि येनैव सृष्टासि मनसा यस्त्वया वृतः ।
SP0120013 स भर्ता तव देवेशो भविता मा तपः कृथाः ॥
SP0120021 ततः प्रदक्षिणं कृत्वा ब्रह्मा व्यास गिरेः सुताम् ।
SP0120022 जगामादर्शनं तस्याः सा चापि विरराम ह ॥
SP0120031 सा देवी युक्तमित्येवमुक्त्वा स्वस्याश्रमस्य ह ।
SP0120032 द्वारि जातमशोकं वै समुपाश्रित्य संस्थिता ॥
SP0120041 अथागाच्चन्द्रतिलकस्त्रिदशार्तिहरो हरः ।
SP0120042 विकृतं रूपमास्थाय ह्रस्वो बाहुक एव च ॥
SP0120051 विभुग्ननासिको भूत्वा कुब्जः केशान्तपिङ्गलः ।
SP0120052 उवाच विकृतास्यश्च देवि त्वां वरयाम्यहम् ॥
SP0120061 अथोमा योगसंसिद्धा ज्ञात्वा शंकरमागतम् ।
SP0120062 अन्तर्भावविशुद्धा सा क्रियानुष्ठानलिप्सया ॥
SP0120071 तमुवाचार्घ्यमानाय्य मधुपर्केण चैव हि ।
SP0120072 सम्पूज्य ससुखासीनं ब्राह्मणं ब्राह्मणप्रिया ॥
SP0120080 देव्युवाच ।
SP0120081 भगवन्नस्वतन्त्रास्मि पिता मेऽस्त्यरणी तथा ।
SP0120082 तौ प्रभू मम दाने वै कन्याहं द्विजपुंगव ॥
SP0120091 गत्वा याचस्व पितरं मम शैलेन्द्रमव्ययम् ।
SP0120092 स चेद्ददाति मां विप्र तुभ्यं तद्रुचितं मम ॥
SP0120100 सनत्कुमार उवाच ।
SP0120101 ततः स भगवान्देवस्तथैव विकृतः प्रभुः ।
SP0120102 उवाच शैलराजं तमुमां मे यच्छ शैलराट् ॥
SP0120111 स तं विकृतरूपेण ज्ञात्वा रुद्रमथाव्ययम् ।

SP0120112 भीतः शापाच्च विमना इदं वचनमब्रवीत् ॥
SP0120121 भगवन्नावमन्यामि ब्राह्मणान्भूमिदैवतान् ।
SP0120122 मनीषितं तु यत्पूर्वं तच्छृणुष्व महातपः ॥
SP0120131 स्वयंवरो मे दुहितुर्भविता विप्रपूजितः ।
SP0120132 वरयेद्यं स्वयं तत्र स भर्तास्या भवेदिति ॥
SP0120140 सनत्कुमार उवाच ।
SP0120141 तच्छ्रुत्वा शैलवचनं भगवान्गोवृषध्वजः ।
SP0120142 देव्याः समीपमागत्य इदमाह महामनाः ॥
SP0120151 देवि पित्रा तवाज्ञप्तः स्वयंवर इति श्रुतम् ।
SP0120152 तत्र त्वं वरयित्री यं स ते भर्ता किलानघे ॥
SP0120161 तदापृच्छे गमिष्यामि दुर्लभा त्वं वरानने ।
SP0120162 रूपवन्तं समुत्सृज्य वृणीथा मादृशं कथम् ॥
SP0120170 सनत्कुमार उवाच ।
SP0120171 तेनोक्ता सा तदा तत्र भावयन्ती तदीरितम् ।
SP0120172 भावं च रुद्रनिहितं प्रसादं मनसस्तथा ॥
SP0120181 सम्प्राप्योवाच देवेशं मा ते भूद्बुद्धिरन्यथा ।
SP0120182 अहं त्वां वरयिष्यामि नान्यद्भूतं कथंचन ॥
SP0120191 अथ वा तेऽस्ति संदेहो मयि विप्र कथंचन ।
SP0120192 इहैव त्वां महाभाग वरयामि मनोरथम् ॥
SP0120200 सनत्कुमार उवाच ।
SP0120201 गृहीत्वा स्तबकं सा तु हस्ताभ्यां तत्र संस्थितम् ।
SP0120202 स्कन्धे शम्भोः समादाय देवी प्राह वृतोऽसि मे ॥
SP0120211 ततः स भगवान्देवस्तथा देव्या वृतस्तदा ।
SP0120212 उवाच तमशोकं वै वाचा संजीवयन्निव ॥
SP0120221 यस्मात्तव सुपुष्पेण स्तबकेन वृतो ह्यहम् ।
SP0120222 तस्मात्त्वं जरया त्यक्तः अमरः सम्भविष्यसि ॥
SP0120231 कामरूपः कामपुष्पः कामगो दयितो मम ।
SP0120232 सर्वाभरणपुष्पाढ्यः सर्ववृक्षफलोपगः ॥
SP0120241 सर्वान्नभक्षदश्चैव अमृतस्रव एव च ।
SP0120242 सर्वगन्धश्च देव्यास्त्वं भविष्यसि दृढं प्रियः ।
SP0120243 निर्भयः सर्वलोकेषु चरिष्यसि सुनिर्वृतः ॥
SP0120251 आश्रमं चैवमत्यर्थं चित्रकूटेति विश्रुतम् ।
SP0120252 योऽभियास्यति पुण्यार्थी सोऽश्वमेधमवाप्स्यति ।
SP0120253 यत्र तत्र मृतश्चापि ब्रह्मलोकं गमिष्यति ॥
SP0120261 यश्चात्र नियमैर्युक्तः प्राणान्सम्यक्परित्यजेत् ।
SP0120262 स देव्यास्तपसा युक्तो महागणपतिर्भवेत् ॥

SP0120270 सनत्कुमार उवाच ।
SP0120271 एवमुक्त्वा तदा देव आपृच्छ्य हिमवत्सुताम् ।
SP0120272 अन्तर्दधे जगत्स्रष्टा सर्वभूतप ईश्वरः ॥
SP0120281 सापि देवी गते तस्मिन्भगवत्यमितात्मनि ।
SP0120282 तत एवोन्मुखी स्थित्वा शिलायां संविवेश ह ॥
SP0120291 उन्मुखी सा गते तस्मिन्महेष्वासे प्रजापतौ ।
SP0120292 निशेव चन्द्ररहिता सा बभौ विमनास्तदा ॥
SP0120301 अथ शुश्राव सा शब्दं बालस्यार्तस्य शैलजा ।
SP0120302 सरस्युदकसम्पूर्णे समीपे चाश्रमस्य ह ॥
SP0120311 स कृत्वा बालरूपं तु देवदेवः स्वयं शिवः ।
SP0120312 क्रीडाहेतोः सरोमध्ये ग्राहग्रस्तोऽभवत्तदा ॥
SP0120321 योगमायामथास्थाय प्रपञ्चोद्भवकारणम् ।
SP0120322 तद्रूपं सरसो मध्ये कृत्वेदं समभाषत ।
SP0120323 त्रातु मां कश्चिदेत्येह ग्राहेण हृतचेतसम् ॥
SP0120331 धिक्कष्टं बाल एवाहमप्राप्तार्थमनोरथः ।
SP0120332 यास्यामि निधनं वक्त्रे ग्राहस्यास्य दुरात्मनः ॥
SP0120341 शोचामि न स्वकं देहं ग्राहग्रस्तोऽपि दुःखितः ।
SP0120342 यथा शोचामि पितरं मातरं च तपस्विनीम् ॥
SP0120351 मां श्रुत्वा ग्राहवदने प्राप्तं निधनमुत्सुकौ ।
SP0120352 प्रियपुत्रावेकपुत्रौ प्राणान्नूनं विहास्यतः ॥
SP0120360 सनत्कुमार उवाच ।
SP0120361 श्रुत्वा तु देवी तं नादं विप्रस्यार्तस्य शोभना ।
SP0120362 उत्थाय प्रद्रुता तत्र यत्र तिष्ठत्यसौ द्विजः ॥
SP0120371 सापश्यदिन्दुवदना बालकं चारुरूपिणम् ।
SP0120372 ग्राहेण ग्रस्यमानं तं वेपमानमवस्थितम् ॥
SP0120381 सोऽपि ग्राहवरः श्रीमान्दृष्ट्वा देवीमुपागताम् ।
SP0120382 तं गृहीत्वा द्रुतं यातो मध्यं सरस एव ह ॥
SP0120391 स कृष्यमाणस्तेजस्वी नादमार्तं तदाकरोत् ।
SP0120392 अथाह देवी दुःखार्ता बालं दृष्ट्वा महाव्रता ॥
SP0120401 ग्राहराज महासत्त्व बालकं ह्येकपुत्रकम् ।
SP0120402 विसृजैनं महादंष्ट्र क्षिप्रं भीमपराक्रम ॥
SP0120410 ग्राह उवाच ।
SP0120411 यो देवि दिवसे षष्ठे प्रथमं समुपैति माम् ।
SP0120412 स आहारो मम पुरा विहितो लोककर्तृभिः ॥
SP0120421 सोऽयं मम महाभागे षष्ठेऽहनि गिरीन्द्रजे ।
SP0120422 ब्रह्मणा विहितो नूनं नैनं मोक्ष्ये कथंचन ॥

SP0120430 देव्युवाच ।
SP0120431 यन्मया हिमवच्छृङ्गे चरितं तप उत्तमम् ।
SP0120432 तेन बालमिमं मुञ्च ग्राहराज नमोऽस्तु ते ॥
SP0120440 ग्राह उवाच ।
SP0120441 मा व्ययं तपसो देवि कार्षीः शैलेन्द्रनन्दने ।
SP0120442 नैनं मोचयितुं शक्तो देवराजोऽपि स स्वयम् ॥
SP0120451 मह्यमीशेन तुष्टेन शर्वेणोग्रेण शूलिना ।
SP0120452 अमरत्वमवध्यत्वमक्षयं बलमेव च ॥
SP0120461 स्वयंग्रहणमोक्षश्च ज्ञानं चैवाव्ययं पुनः ।
SP0120462 दत्तं ततो ब्रवीमि त्वां नायं मोक्षमवाप्स्यति ॥
SP0120471 अथ वा ते कृपा देवि भृशं बाले शुभानने ।
SP0120472 ब्रवीमि यत्कुरु तथा ततो मोक्षमवाप्स्यति ॥
SP0120480 देव्युवाच ।
SP0120481 ग्राहाधिप वदस्वाशु यत्सतामविगर्हितम् ।
SP0120482 तत्कृतं नात्र संदेहो मान्या मे ब्राह्मणा दृढम् ॥
SP0120490 ग्राह उवाच ।
SP0120491 यत्कृतं वै तपः किंचिद्भवत्या स्वल्पमन्तशः ।
SP0120492 तत्सर्वं मे प्रयच्छस्व ततो मोक्षमवाप्स्यति ॥
SP0120500 देव्युवाच ।
SP0120501 जन्मप्रभृति यत्पुण्यं महाग्राह कृतं मया ।
SP0120502 तत्ते सर्वं मया दत्तं बालं मुञ्च ममाग्रतः ॥
SP0120510 सनत्कुमार उवाच ।
SP0120511 प्रजज्वाल ततो ग्राहस्तपसा तेन बृंहितः ।
SP0120512 आदित्य इव मध्याह्ने दुर्निरीक्ष्यस्तदाभवत् ॥
SP0120521 उवाच चेदं तुष्टात्मा देवीं लोकस्य धारिणीम् ।
SP0120522 देवि किं कृतमेतत्ते अनिश्चित्य महाव्रते ।
SP0120523 तपसो ह्यर्जनं दुःखं तस्य त्यागो न शस्यते ॥
SP0120531 गृहाण तप एतच्च बालं चेमं शुचिस्मिते ।
SP0120532 तुष्टोऽस्मि ते विप्रभक्त्या वरं तस्माद्ददामि ते ॥
SP0120541 सा त्वेवमुक्ता ग्राहेण उवाचेदं महाव्रता ।
SP0120542 सुनिश्चित्य महाग्राह कृतं बालस्य मोक्षणम् ।
SP0120543 न विप्रेभ्यस्तपः श्रेष्ठं श्रेष्ठा मे ब्राह्मणा मताः ॥
SP0120551 दत्त्वा चाहं न गृह्णामि ग्राहेन्द्र विदितं हि ते ।
SP0120552 न हि कश्चिन्नरो ग्राह प्रदत्तं पुनराहरेत् ॥
SP0120561 दत्तमेतन्मया तुभ्यं नाददानि हि तत्पुनः ।
SP0120562 त्वय्येव रमतामेतद्बालश्चायं विमुच्यताम् ॥

SP0120571 तथोक्तस्तां प्रशस्याथ मुक्त्वा बालं नमस्य च ।
SP0120572 देवीमादित्यसङ्काशं तत्रैवान्तरधीयत ॥
SP0120581 बालोऽपि सरसस्तीरे मुक्तो ग्राहेण वै तदा ।
SP0120582 स्वप्नलब्ध इवार्थौघस्तत्रैवान्तरधीयत ॥
SP0120591 तपसोऽथ व्ययं मत्वा देवी हिमगिरीन्द्रजा ।
SP0120592 भूय एव तपः कर्तुमारेभे यत्नमास्थिता ॥
SP0120601 कर्तुकामां तपो भूयो ज्ञात्वा तां शंकरः स्वयम् ।
SP0120602 प्रोवाच वचनं व्यास मा कृथास्तप इत्युत ॥
SP0120611 मह्यमेतत्तपो देवि त्वया दत्तं महाव्रते ।
SP0120612 तेनैवमक्षयं तुभ्यं भविष्यति सहस्रधा ॥
SP0120621 इति लब्ध्वा वरं देवी तपसोऽक्षय्यमुत्तमम् ।
SP0120622 स्वयंवरमुदीक्षन्ती तस्थौ प्रीतिमुदायुता ॥
SP0120631 इदं पठेद्यो हि नरः सदैव बालानुभावाचरणं हि शम्भोः ।
SP0120632 स देहभेदं समवाप्य पूतो भवेद्गणस्तस्य कुमारतुल्यः ॥
SP0129999 इति स्कन्दपुराणे द्वादशमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय १३

SP0130010 सनत्कुमार उवाच ।
SP0130011 विस्तृते हिमवत्पृष्ठे विमानशतसंकुले ।
SP0130012 अभवत्स तु कालेन शैलपुत्र्याः स्वयंवरः ॥
SP0130021 अथ पर्वतराजोऽसौ हिमवान्ध्यानकोविदः ।
SP0130022 दुहितुर्देवदेवेन ज्ञात्वा तदभिमन्त्रितम् ॥
SP0130031 जानन्नपि महाशैलः समाचारक्रियेप्सया ।
SP0130032 स्वयंवरं ततो देव्याः सर्वलोकेष्वघोषयत् ॥
SP0130041 देवदानवसिद्धानां सर्वलोकनिवासिनाम् ।
SP0130042 वृणुयात्परमेशानं समक्षं येन मे सुता ॥
SP0130051 तदेव सुकृतं श्लाघ्यं ममाभ्युदयसंमतम् ।
SP0130052 इति संचिन्त्य शैलेन्द्रः कृत्वा हृदि महेश्वरम् ॥
SP0130061 आब्रह्मकेषु लोकेषु देव्याः शैलेन्द्रसत्तमः ।
SP0130062 कृत्वा रत्नाकुलं देशं स्वयंवरमचीकरत् ॥
SP0130071 अथैवमाघोषितमात्र एव स्वयंवरे व्यास महीध्रपुत्र्याः ।
SP0130072 देवादयः सर्वजगन्निवासाः समाययुर्दिव्यगृहीतवेषाः ॥
SP0130081 प्रफुल्लपद्मासनसंनिविष्टः सिद्धैर्वृतो योगिभिरप्रमेयैः ।
SP0130082 विज्ञापितस्तेन महीध्रराज्ञा पितामहस्तत्र समाजगाम ॥
SP0130091 अक्ष्णां सहस्रं सुरराट् स बिभ्रद्दिव्याशणगहारस्रगुदात्तरूपः ।
SP0130092 ऐरावतं सर्वगजेन्द्रमुख्यं स्रवन्मदासारकृतप्रवाहम् ।

SP0130093 आरुह्य सर्वामरराट् स वज्रं बिभ्रत्समागात्पुरतः सुराणाम् ॥
SP0130101 तेजःप्रतापाधिकदिव्यरूपः प्रोद्भासयन्सर्वदिशो विवस्वान् ।
SP0130102 हैमं विमानं सचलत्पताकमारुह्य आगात्त्वरितं जवेन ॥
SP0130111 मणिप्रदीप्तोज्ज्वलकुण्डलश्च वह्न्यर्कतेजःप्रतिमे विमाने ।
SP0130112 समभ्यगात्कश्यपविप्रसूनुरादित्य आगाङ्गनामधारी ॥
SP0130121 पीनाशृङ्गयष्टिः सुकृताशृङ्गहारस्तेजोबलाज्ञासदृशप्रभावः ।
SP0130122 दण्डं समादाय कृतान्त आगादारुह्य भीमं महिषं जवेन ॥
SP0130131 महामहीध्रोच्छ्रयपीनगात्रः स्वर्णादिरत्नाचितचारुवेषः ।
SP0130132 समीरणः सर्वजगद्विभर्ता विमानमारुह्य समभ्यगाद्धि ॥
SP0130141 संतापयन्सर्वसुरासुरेशांस्तेजोधिकस्तेजसि संनिविश्य ।
SP0130142 वह्निः समभ्येत्य सुरेन्द्रमध्ये ज्वलन्प्रतस्थौ वरवेषधारी ॥
SP0130151 नानामणिप्रज्वलिताशृङ्गयष्टिर्जगच्चरन्दिव्यविमानमग्र्यम् ।
SP0130152 आरुह्य सर्वद्रविणाधिपेशः स राजराजस्त्वरितोऽभ्यगाच्च ॥
SP0130161 आप्याययन्सर्वसुरासुरेशान्कान्त्या च वेषेण च चारुरूपः ।
SP0130162 ज्वलन्महारत्नविचित्ररूपं विमानमारुह्य शशी समागात् ॥
SP0130171 श्यामाशृङ्गयष्टिः सुविचित्रवेषः सर्वस्रगाबद्धसुगन्धमाली ।
SP0130172 तार्क्ष्यं समारुह्य महीध्रकल्पं गदाधरोऽसौ त्वरितं समेतः ॥
SP0130181 तथाश्विनौ देवभिषग्वरौ तु एकं विमानं त्वरयाभिरुह्य ।
SP0130182 मनोहरावुज्ज्वलचारुवेषावाजग्मतुर्देवसदः सुवीरौ ॥
SP0130191 शेषः सहस्रं स्फुरदग्निवर्णं बिभ्रत्स्फटानां ज्वलनार्कतेजाः ।
SP0130192 सार्धं स नागैरपरैर्महात्मा विमानमारुह्य समभ्यगाच्च ॥
SP0130201 दितेः सुतानां च महासुराणां वह्न्यर्कशक्रानिलतुल्यभासाम् ।
SP0130202 वरानुरूपं प्रविधाय वेषं वृन्दं समागात्पुरतः सुराणाम् ॥
SP0130211 गन्धर्वराजः स च चारुरूपी दिव्यशृङ्गमो दिव्यविमानचारी ।
SP0130212 गन्धर्वसंघैः सहितोऽप्सरोभिः शक्राज्ञया तत्र समाजगाम ॥
SP0130221 अन्ये च देवास्त्रिदिवौकसेशाः पृथक्पृथक्चारुगृहीतवेषाः ।
SP0130222 आजग्मुरारुह्य विमानपृष्ठं गन्धर्वयक्षोरगकिंनराश्च ॥
SP0130231 शचीपतिस्तत्र सुरेन्द्रमध्ये राजाधिकाराधिकलक्ष्यमूर्तिः ।
SP0130232 आज्ञाबलैश्वर्यकृतप्रमोहो वृथाधिकं यत्नमुपाचकार ॥
SP0130241 हेतुस्त्रिलोकस्य जगत्प्रसूतेर्माता च तेषां ससुरासुराणाम् ।
SP0130242 पत्नी च शम्भोः पुरुषस्य धाम्नो गीता पुराणे प्रकृतिः परार्था ।
SP0130243 दक्षस्य कोपाद्धिमवद्गृहं सा कार्यार्थमागात्परमेशपत्नी ॥
SP0130251 एवं यतस्तां न विदुः सुरेशा मोहस्ततस्तान्पर आविवेश ।
SP0130252 वरार्थमाजग्मुरतो विमूढा ईशेन यस्माद्भूडिताः कृतास्ते ॥
SP0130261 ततः प्रनृत्ताभिरथाप्सरोभिर्गन्धर्वसंघैश्च सुगीतशब्दैः ।
SP0130262 स्थितैश्च नानाविधरूपवेषैर्देवासुरादित्रिदिवौकसंघैः ॥

SP0130271 विमानपृष्ठे मणिहेमचित्रे स्थिता चलच्चामरवीजिताश्ग्गी ।
SP0130272 सर्वर्तुपुष्पां सुसुगन्धमालां प्रगृह्य देवी प्रसभं प्रतस्थे ॥
SP0130280 सनत्कुमार उवाच ।
SP0130281 मालां प्रगृह्य देव्यां तु स्थितायां देवसंसदि ।
SP0130282 शक्राद्यैरागतैर्देवैः स्वयंवरमुपागतैः ॥
SP0130291 देव्या जिज्ञासया शम्भुर्भूत्वा पञ्चशिखः शिशुः ।
SP0130292 उत्सश्ग्गतलसंसुप्तो बभूव सहसा विभुः ॥
SP0130301 अकस्मादथ तं देवी शिशुं पञ्चशिखं स्थितम् ।
SP0130302 ज्ञात्वा योगसमाधानाज्जहृषे प्रीतिसंयुता ॥
SP0130311 अथ सा शुद्धसंकल्पा काश्ङ्क्षितप्राप्तसत्फला ।
SP0130312 निर्वृतेव तदा तस्थौ कृत्वा हृदि तमेव तु ॥
SP0130321 ततो दृष्ट्वा शिशुं देवा देव्या उत्सश्ग्गवर्तिनम् ।
SP0130322 कोऽयमत्रेति संमन्त्र्य चुक्रुधुर्भृशमार्दिताः ॥
SP0130331 वज्रमाकारयत्तस्य बाहुमुत्क्षिप्य वृत्रहा ।
SP0130332 स बाहुरुत्थितस्तस्य तथैव समतिष्ठत ॥
SP0130341 स्तम्भितः शिशुरूपेण देवदेवेन शम्भुना ।
SP0130342 वज्रं क्षेप्तुं न शशाक बाहुं चालयितुं न च ॥
SP0130351 भगो नाम ततो देव आदित्यः काश्यपो बली ।
SP0130352 उत्क्षिप्य मुशलं दीप्तं क्षेप्तुमैच्छद्विमोहितः ।
SP0130353 तस्यापि भगवान्बाहुं तथैवास्तम्भयत्तदा ॥
SP0130361 शिरः प्रकम्पयन्विष्णुः सक्रोधस्तमवैक्षत ।
SP0130362 तस्यापि शिरसो देवः खालित्यं प्रचकार ह ॥
SP0130371 पूषा दन्तान्दशन्दन्तैः शर्वमैक्षत मोहितः ।
SP0130372 तस्यापि दशनाः पेतुर्दृष्टमात्रस्य शम्भुना ॥
SP0130381 यमस्य स्तम्भितो दण्डस्तेजो वह्नेः शशेः प्रभा ।
SP0130382 बलं वायोस्तथान्येषां तस्मिन्सर्वदिवौकसाम् ।
SP0130383 बलं तेजश्च योगं च तथैवास्तम्भयद्विभुः ॥
SP0130391 अथ तेषु स्थितेष्वेवं मन्युमत्सु सुरेषु तु ।
SP0130392 ब्रह्मा परमसंविग्नो ध्यानमास्थाय सादरम् ।
SP0130393 बुबुधे देवदेवेशमुमोत्सश्ग्गसमास्थितम् ॥
SP0130401 स बुद्ध्वा परमेशानं शीघ्रमुत्थाय सादरम् ।
SP0130402 ववन्दे चरणौ शम्भोरस्तुवच्च पितामहः ।
SP0130403 पौराणैः सामसंगीतैः पुण्याख्यैर्गुह्यनामभिः ॥
SP0130411 अजस्त्वममरो देव स्रष्टा हर्ता विभुः परः ।
SP0130412 प्रधानपुरुषस्तत्त्वं ब्रह्म ध्येयं तदक्षयम् ॥
SP0130421 अमृतं परमात्मा च ईश्वरः कारणं महत् ।

SP0130422 ब्रह्मकृत्प्रकृतेः स्रष्टा सर्वसृक्परमेश्वरः ॥
SP0130431 इयं च प्रकृतिर्देवी सदा ते सृष्टिकारणम् ।
SP0130432 पत्नीरूपं समास्थाय जगत्कारणमागता ॥
SP0130441 नमस्तुभ्यं सदेशान देव्याश्चैव सदा नमः ।
SP0130442 प्रसादात्तव देवेश नियोगाच्च मया प्रजाः ॥
SP0130451 देवाद्यास्त इमे सृष्टा मूढास्त्वद्योगमोहिताः ।
SP0130452 कुरु प्रसादमेतेषां यथापूर्वं भवन्त्विमे ॥
SP0130461 तत एवं तदा ब्रह्मा विज्ञाप्य परमेश्वरम् ।
SP0130462 स्तम्भितान्सर्वदेवांस्तानिदमाह महाद्युतिः ॥
SP0130471 मूढाः स्थ देवताः सर्वे नैनं बुध्यत शंकरम् ।
SP0130472 देवदेवमिहायातं ममैवोत्पत्तिकारणम् ॥
SP0130481 अयं रुद्रो महादेवः शर्वो भीमः कपर्दिमान् ।
SP0130482 उग्र ईशान आत्मा च अजः शंकर एव च ॥
SP0130491 देवदेवः परं धाम ईशः पशुपतिः पतिः ।
SP0130492 जगत्स्रष्टा जगद्धर्ता जगत्संस्थितिकारणम् ॥
SP0130501 गच्छध्वं शरणं शीघ्रमेवमेवामरेश्वराः ।
SP0130502 सार्धं मयैव देवेशं परमात्मानमव्ययम् ॥
SP0130511 ततस्ते स्तम्भिताः सर्वे तथैव त्रिदिवौकसः ।
SP0130512 प्रणेमुर्मनसा शर्वं भावशुद्धेन चेतसा ॥
SP0130521 अथ तेषां प्रसन्नोऽभूद्देवदेवो महेश्वरः ।
SP0130522 यथापूर्वं चकाराशु देवतानां तनूस्तदा ॥
SP0130531 तत एवं प्रवृत्ते तु सर्वदेवनिवारणे ।
SP0130532 वपुश्चकार देवेशस्त्र्यक्षं परममद्भुतम् ।
SP0130533 तेजसा यस्य देवास्ते चक्षुरप्रार्थयन्विभुम् ॥
SP0130541 तेभ्यः परमकं चक्षुः स्ववपुर्दृष्टिशक्तिमत् ।
SP0130542 प्रादात्परमदेवेशः अपश्यंस्ते तदा प्रभुम् ॥
SP0130551 ते दृष्ट्वा परमेशानं तृतीयेक्षणधारिणम् ।
SP0130552 ब्रह्माद्या नेमिरे तूर्णं सर्व एव सुरेश्वराः ॥
SP0130561 तस्य देवी तदा हृष्टा समक्षं त्रिदिवौकसाम् ।
SP0130562 पादयोः स्थापयामास स्रग्मालाममितद्युतेः ॥
SP0130571 साधु साध्विति सम्प्रोच्य देवतास्ते पुनर्विभुम् ।
SP0130572 सह देव्या नमश्चक्रुः शिरोभिर्भूतलाश्रितैः ॥
SP0130581 अथास्मिन्नन्तरे व्यास ब्रह्मा लोकपितामहः ।
SP0130582 हिमवन्तं महाशैलमिदमाह महाद्युतिः ॥
SP0130591 श्लाघ्यः पूज्यश्च वन्द्यश्च सर्वेषां नस्त्वमद्य हि ।
SP0130592 शर्वेण सह सम्बन्धो यस्य तेऽभूदयं महान् ।

SP0130593 क्रियतां चाशु उद्वाहः किमर्थं स्थीयते परम् ॥
SP0130601 ततः प्रणम्य हिमवांस्तं देवं प्रत्यभाषत ।
SP0130602 त्वमेव कारणं देव येन शर्वादयं मम ॥
SP0130611 प्रसादः सहसोत्पन्नो हेतुश्चापि त्वमेव हि ।
SP0130612 उद्वाहं तु यथा यादृक्तद्विधत्स्व पितामह ॥
SP0130621 तत एवं वचः श्रुत्वा गिरिराज्ञः पितामहः ।
SP0130622 उद्वाहः क्रियतां देव इति देवमुवाच ह ।
SP0130623 तमाह शंकरो देवं यथेष्टमिति लोकपः ॥
SP0130631 तत्क्षणाच्च ततो व्यास ब्रह्मणा कल्पितं पुरम् ।
SP0130632 उद्वाहार्थं महेशस्य नानारत्नोपशोभितम् ॥
SP0130641 रत्नानि मणयश्चित्रा हेम मौक्तिकमेव च ।
SP0130642 मूर्तिमन्त उपागम्य अलंचक्रुः पुरोत्तमम् ॥
SP0130651 चित्रा मारकती भूमिः सौवर्णस्तम्भशोभिता ।
SP0130652 भास्वत्स्फटिकभित्तीभिर्मुक्ताहारप्रलम्बिता ॥
SP0130661 तस्मिञ्छिवपुरे रम्ये उद्वाहार्थं विनिर्मिते ।
SP0130662 शुशुभे देवदेवस्य महेशस्य महात्मनः ॥
SP0130671 सोमादित्यौ समं तत्र भासयन्तौ महामणी ।
SP0130672 सौरभेयं मनोरम्यं गन्धमाघ्राय मारुतः ।
SP0130673 प्रववौ सुखसंस्पर्श ईशे भक्तिं प्रसादयन् ॥
SP0130681 समुद्रास्तत्र चत्वारः शक्राद्याश्च सुरोत्तमाः ।
SP0130682 देवनद्यो महानद्यः सिद्धा मुनय एव च ॥
SP0130691 गन्धर्वाप्सरसः सर्वे नागा यक्षाः सराक्षसाः ।
SP0130692 गुह्यकाः खेचराश्चान्ये किंनरा देवचारणाः ॥
SP0130701 तुम्बुरुर्नारदो हाहा हूहू चैव तु सामगाः ।
SP0130702 रत्नान्यादाय वाद्यांश्च तत्राजग्मुस्तदा पुरम् ॥
SP0130711 ऋषयः कृत्स्नशस्तत्र वेदगीतांस्तपोधनाः ।
SP0130712 पुण्यान्वैवाहिकान्मन्त्राञ्जेपुः संहृष्टमानसाः ॥
SP0130721 जगतो मातरः सर्वा देवकन्याश्च कृत्स्नशः ।
SP0130722 गायन्ति हृषिताः सर्वा उद्वाहे परमेष्ठिनः ॥
SP0130731 ऋतवः षट् समं तत्र नानागन्धसुखावहाः ।
SP0130732 उद्वाहः शंकरस्येति मूर्तिमन्त उपस्थिताः ॥
SP0130741 नीलजीमूतसंघातमन्द्रध्वानप्रहर्षितैः ।
SP0130742 केकायमानैः शिखिभिर्नृत्यमानैश्च सर्वशः ॥
SP0130751 विलोलपिश्णगलस्पष्टविद्युल्लेखावभासिता ।
SP0130752 कुमुदापीतशुक्लाभिर्बलाकाभिश्च शोभिता ॥
SP0130761 प्रत्यग्रसंजातशिलीन्ध्रकन्दला लताद्रुमाभ्युद्गतचारुपल्लवा ।

SP0130762 शुभाम्बुधाराप्रणयप्रबोधितैर्मदालसैर्भेकगणैश्च नादिता ॥
SP0130771 प्रियेषु मानोन्नतमानसानां सुनिश्चितानामपि कामिनीनाम् ।
SP0130772 मयूरकेकाभिरुतैः क्षणेन मनोहरैर्मानविभश्णगकर्त्री ॥
SP0130781 तथा त्रिवर्णोज्ज्वलचारुमूर्तिना शशाश्णकलेखाकुटिलेन सर्वतः ।
SP0130782 पयोदसंघातसमीपवर्तिना महेन्द्रचापेन भृशं विराजिता ॥
SP0130791 विचित्रपुष्पस्पर्शात्सुगन्धिभिर्घनाम्बुसम्पर्कतया सुशीतलैः ।
SP0130792 विकम्पयन्ती पवनैर्मनोहरैः सुराश्णगनानामलकावलीः शुभाः ॥
SP0130801 गर्जत्पयोदस्थगितेन्दुबिम्बा नवाम्बुसेकोद्गतचारुदूर्वा ।
SP0130802 निरीक्षिता सादरमुत्सुकाभिर्निश्वासधूम्रं पथिकाश्णगनाभिः ॥
SP0130811 हंसनूपुरशब्दाढ्या समुन्नतपयोधरा ।
SP0130812 चलद्विद्युल्लताकाञ्ची स्पष्टपद्मविलोचना ॥
SP0130821 असितजलदवृन्दध्वानवित्रस्तहंसा विमलसलिलधारापातनम्रोत्पलाग्रा ।
SP0130822 सुरभिकुसुमरेणुक्ल्प्तसर्वाश्णगशोभा गिरिदुहितृविवाहे प्रावृडागाद्विभूत्यै ॥
SP0130831 मेघकञ्चुकनिर्मुक्ता पद्मकोशोद्गतस्तनी ।
SP0130832 हंसनूपुरनिर्ह्रादा सर्वरम्यदिगन्तरा ॥
SP0130841 विस्तीर्णपुलिनश्रोणी कूजत्सारसमेखला ।
SP0130842 प्रफुल्लेन्दीवराभोगविलोचनमनोहरा ॥
SP0130851 पक्वबिम्बाधरपुटा कुन्ददन्तप्रहासिनी ।
SP0130852 नवश्यामालताश्यामरोमराजीपरिष्कृता ॥
SP0130861 चन्द्रांशुहारवर्येण सौधोरःस्थलसर्पिणा ।
SP0130862 प्रह्लादयन्ती चेतांसि सर्वेषां त्रिदिवौकसाम् ॥
SP0130871 समदालिकुलोद्गीतमधुरस्वरभाषिणी ।
SP0130872 चलत्कुमुदसंघातचारुकुण्डलशोभिनी ॥
SP0130881 रक्ताशोकाग्रशाखोत्थपल्लवाश्णगुलिधारिणी ।
SP0130882 तत्पुष्पसंचयमयैर्वासोभिः समलंकृता ॥
SP0130891 रक्तोत्पलाग्रचरणा जातीपुष्पनखावली ।
SP0130892 कदलीस्तम्भचारूरुः शशाश्णकवदना तथा ॥
SP0130901 पद्मकिञ्जल्कसम्पृक्तपवनाग्रकरैः सुरान् ।
SP0130902 प्रेम्णा स्पृशन्ती कान्तेव शरदागान्मनोरमा ॥
SP0130911 निर्मुक्तासितमेघकञ्चुकपुटा पूर्णेन्दुबिम्बानना
SP0130912 नीलाम्भोजविलोचनारविन्दमुकुलप्रोद्भिन्नचारुस्तनी ।
SP0130913 नानापुष्परजःसुगन्धिपवनप्रह्लादनी चेतसां
SP0130914 तत्रागात्कलहंसनूपुररवा देव्या विवाहे शरत् ॥
SP0130921 अत्यर्थशीतलाम्भोभिः प्लावयन्तौ गिरेः शिलाः ।
SP0130922 ऋतू शिशिरहेमन्तावाजग्मतुरतिद्युती ॥
SP0130931 ताभ्यामृतुभ्यां प्राप्ताभ्यां हिमवान्स नगोत्तमः ।

SP0130932 प्रालेयचूर्णवर्षिभ्यां क्षिप्रं रौप्य इवाबभौ ॥
SP0130941 तेन प्रालेयवर्षेण घनेन स हिमाचलः ।
SP0130942 अगाधेन तदा रेजे क्षीरोद इव सागरः ॥
SP0130951 हिमस्थानेषु हिमवान्नाशयामास पादपान् ।
SP0130952 साधूपचारान्सहसा कृतार्थ इव दुर्जनः ॥
SP0130961 प्रालेयपटलच्छन्नैः शृश्ण्गैः स शुशुभे नगः ।
SP0130962 छत्रैरिव महाभोगैः पाण्डरैः पृथिवीपतिः ॥
SP0130971 पाण्डराणि विशालानि श्रीमन्ति सुभगानि च ।
SP0130972 तुश्ण्गानि चाद्रिशृश्ण्गाणि सौधानीव चकाशिरे ॥
SP0130981 तस्याचलेन्द्रस्य दरीष्वतीव विचित्रसारश्ण्गकुलाकुलासु ।
SP0130982 प्रालेयधाराः शशिपादगौरा गोक्षीरधारा इव संनिपेतुः ॥
SP0130991 बहुकुसुमरजोभिरुत्कराश्ण्गा हिमकणसश्ण्गसुशीतलाः समीराः ।
SP0130992 ववुरमरगणेश्वराम्बराणि प्रतनुतमानि शनैर्विकम्पयन्तः ॥
SP0131001 निर्धूतरूक्षानिलशीतदोषः प्रोद्भिन्नचूताश्ण्कुरकर्णपूरः ।
SP0131002 वसन्तकालश्च तमद्रिपुत्रीसेवार्थमागाद्धिमवन्तमाशु ॥
SP0131011 तस्मिन्नृतावद्रिसुताविवाहसिषेवया तं गिरिमभ्युपेते ।
SP0131012 प्रादुर्बभूवुः कुसुमावतंसाः समन्ततः पादपगुल्मषण्डाः ॥
SP0131021 ववुः सुगन्धाः सुभगाः सुशीता विचित्रपुष्पाग्ररजोत्कराश्ण्गाः ।
SP0131022 मनोभवोद्रेककराः सुराणां सुराश्ण्गनानां च मुहुः समीराः ॥
SP0131031 स्वच्छाम्बुपूर्णाश्च तथा नलिन्यः पद्मोत्पलानां मुकुलैरुपेताः ।
SP0131032 ईषत्समुद्भिन्नपयोधराग्रा नार्यो यथा रम्यतमा बभूवुः ॥
SP0131041 ऋतोः स्वभावाच्च मदोद्भवाच्च फुल्लासु शाखासु निलीनपक्षाः ।
SP0131042 चेतोभिरामं त्रिदशाश्ण्गनानां पुंस्कोकिलाश्चातिकलं विनेदुः ॥
SP0131051 नात्युष्णशीतानि सरःपयांसि किञ्जल्कचूर्णैः कपिलीकृतानि ।
SP0131052 चक्राह्वयुग्मैरुपनादितानि पपुः प्रहृष्टाः सुरदन्तिमुख्याः ॥
SP0131061 प्रियश्ण्गूश्चूततरवश्चूतांश्चापि प्रियश्ण्गवः ।
SP0131062 तर्जयन्त इवान्योन्यं मञ्जरीभिश्चकाशिरे ॥
SP0131071 हिमशुक्लेषु शृश्ण्गेषु तिलकाः कुसुमोत्कराः ।
SP0131072 शुशुभुः कार्यमुद्दिश्य वृद्धा इव समागताः ॥
SP0131081 फुल्लाशोकलतास्तत्र रेजिरे शालसंश्रिताः ।
SP0131082 कामिन्य इव कान्तानां कण्ठालम्बितमूर्तयः ॥
SP0131091 समदालिकुलोद्गीतलताकुसुमसंचयाः ।
SP0131092 परस्परं हि मालत्यो भाषन्त्य इव रेजिरे ॥
SP0131101 नीलानि नीलाम्बुरुहैः पयांसि गौराणि गौरैश्च सनालदण्डैः ।
SP0131102 रक्तैश्च रक्तानि भृशं कृतानि मत्तद्विरेफार्धविदष्टपत्रैः ॥
SP0131111 हैमानि विस्तीर्णजलेषु केषुचिन्निरन्तरं मारकतानि केषुचित् ।

SP0131112 वैदूर्यनालानि सरःसु केषुचित्प्रजज्ञिरे पद्मवनानि सर्वतः ॥
SP0131121 वाप्यस्तत्राभवन्रम्याः कमलोत्पलभूषिताः ।
SP0131122 नानाविहगसंघुष्टा हेमसोपानपश्ण्क्तयः ॥
SP0131131 शृश्ण्गाणि तस्य तु गिरेः कर्णिकारैः सुपुष्पितैः ।
SP0131132 समुच्छ्रितान्यविरलैर्हैमानीव बभुर्मुने ॥
SP0131141 ईषदुद्भिन्नकुसुमैः पाटलैश्चापि पाटलाः ।
SP0131142 सम्बभूवुर्दिशः सर्वाः पवनाकम्पिमूर्तिभिः ॥
SP0131151 कृष्णाञ्जनाद्रिशृश्ण्गाभा नीलाशोकमहीरुहाः ।
SP0131152 गिरौ ववृधिरे फुल्लाः स्पर्धयेव परस्परम् ॥
SP0131161 चीरुवाकविघुष्टानि किंशुकानां वनानि च ।
SP0131162 पर्वतस्य नितम्बेषु सर्वेष्वेवाभिजज्ञिरे ॥
SP0131171 तमालगुल्मैस्तस्यासीच्छोभा हिमवतस्तदा ।
SP0131172 नीलजीमूतसंघातैर्निलीनैरिव सन्धिषु ॥
SP0131181 निकामपुष्पैः सुविशालशाखैः समुच्छ्रितैश्चम्पकपादपैश्च ।
SP0131182 प्रमत्तपुंस्कोकिलसम्प्रलापैर्हिमाचलोऽतीव तदा रराज ॥
SP0131191 श्रुत्वा शब्दं ऋतुमदकलं सर्वतः कोकिलानां
SP0131192 चञ्चत्पक्षाः सुमधुररुतं नीलकण्ठा विनेदुः ।
SP0131193 तेषां शब्दैरुपचितबलः पुष्पचापेषुहस्तः
SP0131194 सज्जीभूतस्त्रिदशवनिता वेद्धुमश्ण्गेष्वनश्ण्गः ॥
SP0131201 पटुसूर्यातपश्चापि प्रायः सोष्णजलाशयः ।
SP0131202 देवीविवाहसेवार्थं ग्रीष्म आगाद्धिमाचलम् ॥
SP0131211 स चापि तरुभिस्तत्र बहुभिः कुसुमोत्करैः ।
SP0131212 शोभयामास शृश्ण्गाणि प्रालेयाद्रेः समन्ततः ॥
SP0131221 तस्यापि च ऋतोस्तत्र वायवः सुमनोहराः ।
SP0131222 ववुः पाटलविस्तीर्णकदम्बार्जुनगन्धिनः ॥
SP0131231 वाप्यः प्रफुल्लपद्मौघाः केसरारुणमूर्तयः ।
SP0131232 अभवंस्तटसंघुष्टकलहंसकदम्बकाः ॥
SP0131241 तथा कुरवकाश्चापि कुसुमापाण्डुमूर्तयः ।
SP0131242 सर्वेषु जज्ञुः शृश्ण्गेषु भ्रमरावलिसेविताः ॥
SP0131251 बकुलाश्च नितम्बेषु विशालेषु महीभृतः ।
SP0131252 उत्ससर्जुर्मनोज्ञानि कुसुमानि समन्ततः ॥
SP0131261 इति कुसुमविचित्रसर्ववृक्षा विविधविहंगमनादरम्यदेशाः ।
SP0131262 हिमगिरितनयाविवाहभूत्यै षड्डपययुर्ऋतवो मुनिप्रवीर ॥
SP0131271 तत एवं प्रवृत्ते तु सर्वभूतसमागमे ।
SP0131272 नानावाद्यशताकीर्णे ब्रह्मा मम पिता स्वयम् ॥
SP0131281 शैलपुत्रीमलंकृत्य योग्याभरणसम्पदा ।

SP0131282 पुरं प्रवेशयामास स्वयमादाय लोकधृक् ॥
SP0131291 ततस्तु पुनरेवेशं ब्रह्मा व्यज्ञापयद्विभुम् ।
SP0131292 हविर्जुहोमि वह्नौ तु उपाध्यायपदे स्थितः ।
SP0131293 ददासि मह्यं यद्याज्ञां कर्तव्योऽयं क्रियाविधिः ॥
SP0131301 तमाह शंकरो देवं देवदेवो जगत्पतिः ।
SP0131302 यद्यदिष्टं सुरेशान तत्कुरुष्व यथेप्सितम् ।
SP0131303 कर्तास्मि वचनं सर्वं ब्रह्मंस्तव जगद्विभो ॥
SP0131311 ततः प्रणम्य हृष्टात्मा ब्रह्मा लोकपितामहः ।
SP0131312 हस्तं देवस्य देव्याश्च योगबन्धे युयोज ह ॥
SP0131321 ज्वलनं च स्वयं कृत्वा कृताञ्जलिमुपस्थितं ।
SP0131322 श्रुतिगीतैर्महामन्त्रैर्मूर्तिमद्भिरुपस्थितैः ॥
SP0131331 यथोक्तविधिना हुत्वा सर्पिस्तदमृतं च हि ।
SP0131332 त्रिश्च तं ज्वलनं देवं कारयित्वा प्रदक्षिणम् ॥
SP0131341 मुक्त्वा हस्तसमायोगं सहितः सर्वदेवतैः ।
SP0131342 सुतैश्च मानसैः सर्वैः प्रहृष्टेनान्तरात्मना ।
SP0131343 वृत्ते उद्वाहकाले तु प्रणनाम वृषध्वजम् ॥
SP0131351 योगेनैव तयोर्व्यास तदोमापरमेशयोः ।
SP0131352 उद्वाहः स परो वृत्तो यं देवा न विदुः क्वचित् ॥
SP0131361 इति ते सर्वमाख्यातं स्वयंवरमिदं शुभम् ।
SP0131362 उद्वाहश्चैव देवस्य शृण्वतः परमाद्भुतम् ॥
SP0139999 इति स्कन्दपुराणे नाम त्रयोदशोऽध्यायः ॥

---

## स्कंदपुराण अध्याय १४

SP0140010 सनत्कुमार उवाच ।
SP0140011 अथ वृत्ते विवाहे तु भवस्यामिततेजसः ।
SP0140012 प्रहर्षमतुलं गत्वा देवाः सहपितामहाः ।
SP0140013 तुष्टुवुर्वाग्भिरिष्टाभिः प्रणमन्तो महेश्वरम् ॥
SP0140021 नमः पर्वतलिश्णगाय पर्वतेशाय वै नमः ।
SP0140022 नमः पवनवेगाय विरूपायाजिताय च ॥
SP0140031 नमः क्लेशविनाशाय दात्रे च शुभसम्पदाम् ।
SP0140032 नमो नीलशिखण्डाय अम्बिकापतये नमः ॥
SP0140041 नमः पवनरूपाय शतरूपाय वै नमः ।
SP0140042 नमो भैरवरूपाय विरूपनयनाय च ॥
SP0140051 नमः सहस्रनेत्राय सहस्रचरणाय च ।
SP0140052 नमो वेदरहस्याय वेदाश्णगाय नमो नमः ॥
SP0140061 विष्टम्भनाय शक्रस्य बाहोर्वेदाश्णकुराय च ।

SP0140062 चराचराधिपतये शमनाय नमो नमः ॥
SP0140071 सलिलेशयलिङ्गाय युगान्तायतलिङ्गिने ।
SP0140072 नमः कपालमालाय कपालस्रग्मिणे नमः ॥
SP0140081 नमः कपालहस्ताय दंष्ट्रिणे गदिने नमः ।
SP0140082 नमस्त्रैलोक्यवाहाय सप्तलोकरथाय च ॥
SP0140091 नमः खट्वाङ्गहस्ताय प्रमथार्तिहराय च ।
SP0140092 नमो यज्ञशिरोहर्त्रे कृष्णकेशापहारिणे ॥
SP0140101 भगनेत्रनिपाताय पूष्णो दन्तहराय च ।
SP0140102 नमः पिनाकशूलासिखड्गमुद्गरधारिणे ॥
SP0140111 नमोऽस्तु कालकालाय तृतीयनयनाय च ।
SP0140112 अन्तकान्तकृते चैव नमः पर्वतवासिने ॥
SP0140121 सुवर्णरेतसे चैव सर्पकुण्डलधारिणे ।
SP0140122 वाड्वलेर्योगनाशाय योगिनां गुरवे नमः ॥
SP0140131 शशाङ्कादित्यनेत्राय ललाटनयनाय च ।
SP0140132 नमः श्मशानरतये श्मशानवरदाय च ॥
SP0140141 नमो दैवतनाथाय त्र्यम्बकाय नमो नमः ।
SP0140142 अशनीशतहासाय ब्रह्मण्यायाजिताय च ॥
SP0140151 गृहस्थसाधवे नित्यं जटिने ब्रह्मचारिणे ।
SP0140152 नमो मुण्डार्धमुण्डाय पशूनां पतये नमः ॥
SP0140161 सलिले तप्यमानाय योगैश्वर्यप्रदाय च ।
SP0140162 नमः शान्ताय दान्ताय प्रलयोत्पत्तिकारिणे ॥
SP0140171 नमोऽनुग्रहकर्त्रे च स्थितिकर्त्रे नमो नमः ।
SP0140172 नमो रुद्राय वसवे आदित्यायाश्विने नमः ॥
SP0140181 नमः पित्रेऽथ साध्याय विश्वेदेवाय वै नमः ।
SP0140182 नमः शर्वाय सर्वाय उग्राय वरदाय च ॥
SP0140191 नमो भीमाय सेनान्ये पशूनां पतये नमः ।
SP0140192 शुचये रेरिहाणाय सद्योजाताय वै नमः ॥
SP0140201 महादेवाय चित्राय नमश्चित्ररथाय च ।
SP0140202 प्रधानाय प्रमेयाय कार्याय करणाय च ॥
SP0140211 पुरुषाय नमस्तेऽस्तु पुरुषेच्छाकराय च ।
SP0140212 नमः पुरुषसंयोगप्रधानगुणकारिणे ॥
SP0140221 प्रवर्तकाय प्रकृतेः पुरुषस्य च सर्वशः ।
SP0140222 कृताकृतस्य संवेत्त्रे फलसंयोगदाय च ॥
SP0140231 कालज्ञाय च सर्वत्र नमो नियमकारिणे ।
SP0140232 नमो वैषम्यकर्त्रे च गुणानां वृत्तिदाय च ॥
SP0140241 नमस्ते देवदेवेश नमस्ते भूतभावन ।

SP0140242 शिवः सौम्यः सुखो द्रष्टुं भव सोमो हि नः प्रभो ॥
SP0140250 सनत्कुमार उवाच ।
SP0140251 एवं स भगवान्देवो जगत्पतिरुमापतिः ।
SP0140252 स्तूयमानः सुरैः सर्वैरमरानिदमब्रवीत् ॥
SP0140261 द्रष्टुं सुखश्च सौम्यश्च देवानामस्मि भो सुराः ।
SP0140262 वरं ब्रूत यथेष्टं च दातास्मि वदतानघाः ॥
SP0140271 ततस्ते प्रणताः सर्वे ऊचुः सब्रह्मकाः सुराः ।
SP0140272 तवैव भगवन्हस्ते वर एषोऽवतिष्ठताम् ।
SP0140273 यदा कार्यं तदा नस्त्वं दास्यसे वरमीप्सितम् ॥
SP0140281 एवमस्त्विति तानुक्त्वा विसृज्य च सुरान्हरः ।
SP0140282 लोकांश्च प्रमथैः सार्धं विवेश भवनं ततः ॥
SP0140291 यस्तु हरोत्सवमद्भुतमेतं गायति दैवतविप्रसमक्षम् ।
SP0140292 सोऽप्रतिरूपगणेशसमानो देहविपर्ययमेत्य सुखी स्यात् ॥
SP0140300 सनत्कुमार उवाच ।
SP0140301 पाराशर्य स्तवं हीदं शृणुयाद्यः पठेत वा ।
SP0140302 स स्वर्गलोकगो देवैः पूज्यतेऽमरराडिव ॥
SP0149999 इति स्कन्दपुराणे चतुर्दशमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय १५

SP0150010 सनत्कुमार उवाच ।
SP0150011 प्रविष्टे भवनं देवे सूपविष्टे वरासने ।
SP0150012 स बहिर्मन्मथः क्रूरो देवं वेद्धुमनाभवत् ॥
SP0150021 तमनाचारसंयुक्तं दुरात्मानं कुलाधमम् ।
SP0150022 लोकान्सर्वांस्तापयानं सर्वेष्वकरुणात्मकम् ॥
SP0150031 ऋषीणां विघ्नकर्तारं नियमानां व्रतैः सह ।
SP0150032 चक्राह्वयस्य रूपेण रत्या सह तमागतम् ॥
SP0150041 अथाततायिनं व्यास वेद्धुकामं सुरेश्वरम् ।
SP0150042 नयनेन तृतीयेन सावज्ञं तमवैक्षत ॥
SP0150051 ततोऽस्य नेत्रजो वह्निर्ज्वालामालासहस्रवान् ।
SP0150052 संवृत्य रतिभर्तारमदहत्सपरिच्छदम् ॥
SP0150061 स दह्यमानः करुणमार्तोऽक्रोशत विस्वरम् ।
SP0150062 प्रसादयंश्च तं देवं पपात स महीतले ॥
SP0150071 आशु सोऽग्निपरीताङ्गो मन्मथो लोकतापनः ।
SP0150072 पपात भस्मसाच्चैव क्षणेन समपद्यत ॥
SP0150081 पत्नी तु करुणं तस्य विललाप सुदुःखिता ।
SP0150082 देवं देवीं च दुःखार्ता अयाचत्करुणायती ॥

SP0150091 तस्याश्च करुणां श्रुत्वा देवौ तौ करुणात्मकौ ।
SP0150092 ऊचतुस्तां समालोक्य समाश्वास्य च दुःखिताम् ॥
SP0150101 दग्ध एष ध्रुवं भद्रे नास्योत्पत्तिरिहेष्यते ।
SP0150102 अशरीरोऽपि ते काले कार्यं सर्वं करिष्यति ॥
SP0150111 यदा तु विष्णुर्भविता वसुदेवसुतः शुभे ।
SP0150112 तदा तस्य सुतोऽयं स्यात्पतिस्ते स भविष्यति ॥
SP0150120 सनत्कुमार उवाच ।
SP0150121 ततः सा तं वरं लब्ध्वा कामपत्नी शुभानना ।
SP0150122 जगामेष्टं तदा देशं प्रीतियुक्ता गतक्लमा ॥
SP0150130 सनत्कुमार उवाच ।
SP0150131 एवं दग्ध्वा स कामं तु शंकरो मूढचेतसम् ।
SP0150132 प्रोवाच हिमवत्पुत्रीं भक्त्या मुनिवरस्य ह ॥
SP0150141 वसिष्ठो नाम विप्रेन्द्रो मां कृत्वा हृदि तप्यते ।
SP0150142 तस्याहं वरदानाय प्रयास्यामि महाव्रते ॥
SP0150151 एवमुक्त्वा स देवीं तु भक्तिप्रीत्या तदा विभुः ।
SP0150152 जगाम तप्यतोऽभ्याशं वसिष्ठस्य मुनेर्विभुः ॥
SP0150161 ततो मुनिवरश्रेष्ठं वरिष्ठं तपतां वरम् ।
SP0150162 वसिष्ठमृषिशार्दूलं तप्यमानं परं तपः ॥
SP0150171 पूर्णे वर्षसहस्रे तु ज्वलमानमिवानलम् ।
SP0150172 उवाच भगवान्गत्वा ब्रूहि किं ते ददानि ते ।
SP0150173 ददामि दिव्यं चक्षुस्ते पश्य मां सगणं द्विज ॥
SP0150181 दृष्ट्वा स तु तमीशानं प्रणम्य शिरसा प्रभुम् ।
SP0150182 शिरस्यञ्जलिमाधाय तुष्टाव हृषिताननः ॥
SP0150190 वसिष्ठ उवाच ।
SP0150191 नमः कनकलिश्ङ्गाय वेदलिश्ङ्गाय वै नमः ।
SP0150192 नमः सहस्रलिश्ङ्गाय वह्निलिश्ङ्गाय वै नमः ॥
SP0150201 नमः पुराणलिश्ङ्गाय श्रुतिलिश्ङ्गाय वै नमः ।
SP0150202 नमः पवनलिश्ङ्गाय ब्रह्मलिश्ङ्गाय वै नमः ॥
SP0150211 नमस्त्रैलोक्यलिश्ङ्गाय दाहलिश्ङ्गाय वै नमः ।
SP0150212 नमः पर्वतलिश्ङ्गाय स्थितिलिश्ङ्गाय वै नमः ॥
SP0150221 नमो रहस्यलिश्ङ्गाय सप्तद्वीपोर्ध्वलिश्ङ्गिने ।
SP0150222 नमः सर्वार्थलिश्ङ्गाय सर्वलोकाश्ङ्गलिश्ङ्गिने ॥
SP0150231 नमोऽस्त्वव्यक्तलिश्ङ्गाय बुद्धिलिश्ङ्गाय वै नमः ।
SP0150232 नमोऽहंकारलिश्ङ्गाय भूतलिश्ङ्गाय वै नमः ॥
SP0150241 नम इन्द्रियलिश्ङ्गाय नमस्तन्मात्रलिश्ङ्गिने ।
SP0150242 नमः पुरुषलिश्ङ्गाय भावलिश्ङ्गाय वै नमः ॥

SP0150251 नमः सर्वार्थलिश्ण्गाय तमोलिश्ण्गाय वै नमः ।
SP0150252 नमो रजोर्ध्वलिश्ण्गाय सत्त्वलिश्ण्गाय वै नमः ॥
SP0150261 नमो गगनलिश्ण्गाय तेजोलिश्ण्गाय वै नमः ।
SP0150262 नमो वायूर्ध्वलिश्ण्गाय शब्दलिश्ण्गाय वै नमः ॥
SP0150271 नमो ऋक्स्तुतलिश्ण्गाय यजुर्लिश्ण्गाय वै नमः ।
SP0150272 नमस्तेऽथर्वलिश्ण्गाय सामलिश्ण्गाय वै नमः ॥
SP0150281 नमो यज्ञाश्ण्गलिश्ण्गाय यज्ञलिश्ण्गाय वै नमः ।
SP0150282 नमस्तेऽनन्तलिश्ण्गाय देवानुगतलिश्ण्गने ॥
SP0150291 दिश नः परमं योगमपत्यं मत्समं तथा ।
SP0150292 ब्रह्म चैवाक्षयं देव शमं चैव परं विभो ।
SP0150293 अक्षयत्वं च वंशस्य धर्मे च मतिमक्षयाम् ॥
SP0150300 सनत्कुमार उवाच ।
SP0150301 एवं स भगवान्व्यास वसिष्ठेनामितात्मना ।
SP0150302 स्तूयमानस्तुतोषाथ तुष्टश्चेदं तमब्रवीत् ॥
SP0150310 भगवानुवाच ।
SP0150311 तुष्टस्तेऽहं ददान्येतत्तव सर्वं मनोगतम् ।
SP0150312 योगं च परमं सूक्ष्ममक्षयं सर्वकामिकम् ॥
SP0150321 पौत्रं च त्वत्समं दिव्यं तपोयोगबलान्वितम् ।
SP0150322 ददानि ते ऋषिश्रेष्ठ प्रतिभास्यन्ति चैव ते ॥
SP0150331 दमः शमस्तथा कीर्तिस्तुष्टिरक्रोध एव च ।
SP0150332 नित्यं तव भविष्यन्ति अमरत्वं च सर्वशः ॥
SP0150341 अवध्यत्वमसह्यत्वमक्षयत्वं च सर्वदा ।
SP0150342 वंशस्य चाक्षतिर्विप्र धर्मे च रतिरव्यया ।
SP0150343 ब्रूहि चान्यानपि वरान्ददामि ऋषिसत्तम ॥
SP0150350 वसिष्ठ उवाच ।
SP0150351 भगवन्विदितं सर्वं भविष्यं देवसत्तम ।
SP0150352 न स्याद्धि तत्तथा देव यथा वा मन्यसे प्रभो ॥
SP0150360 देव उवाच ।
SP0150361 भविष्यं नान्यथा कुर्यादिति मे निश्चिता मतिः ।
SP0150362 अहं कर्ता भविष्यस्य कथं कुर्यात्तदन्यथा ॥
SP0150371 तथा तन्नात्र संदेहो विहितं यद्यथा मया ।
SP0150372 तस्मात्तेऽनुग्रहं कर्ता भूयः पुत्रस्तवाव्ययः ॥
SP0150380 सनत्कुमार उवाच ।
SP0150381 एवमुक्त्वा ततो देवः कपर्दी नीललोहितः ।
SP0150382 पश्यतस्तस्य विप्रर्षेः क्षणादन्तरधीयत ॥
SP0159999 इति स्कन्दपुराणे पञ्चदशमोऽध्यायः ॥

SP0160010 व्यास उवाच ।
SP0160011 वरान्स लब्ध्वा भगवान्वसिष्ठोऽस्मत्पितामहः ।
SP0160012 कं पुत्रं जनयामास आत्मनः सदृशद्युतिम् ॥
SP0160020 सनत्कुमार उवाच ।
SP0160021 तेनासौ वरदानेन देवदेवस्य शूलिनः ।
SP0160022 अरुन्धत्यामजनयत्तपोयोगबलान्वितम् ।
SP0160023 ब्रह्मिष्ठं शक्तिनामानं पुत्रं पुत्रशताग्रजम् ॥
SP0160031 तस्य बाल्यात्प्रभृत्येव वासिष्ठस्य महात्मनः ।
SP0160032 परेण चेतसा भक्तिरभवद्गोवृषध्वजे ॥
SP0160041 स कदाचिदपत्यार्थमाराधयदुमापतिम् ।
SP0160042 तस्य तुष्टो महादेवो वरदोऽस्मीत्यभाषत ॥
SP0160051 अथ दृष्ट्वा तमीशानमिदमाहानताननः ।
SP0160052 केन स्तोष्यामि ते देव यस्त्वं सर्वजगत्पतिः ।
SP0160053 सर्वान्धारयसे लोकानात्मना समयाद्विभो ॥
SP0160061 त्वमेव भोक्ता भोज्यं च कर्ता कार्यं तथा क्रिया ।
SP0160062 उत्पादकस्तथोत्पाद्य उत्पत्तिश्चैव सर्वशः ॥
SP0160071 आत्मानं पुत्रनामानं मम तुल्यं गुणैर्विभो ।
SP0160072 इच्छामि दत्तं देवेश एष मे दीयतां वरः ॥
SP0160080 सनत्कुमार उवाच ।
SP0160081 तमेवंवादिनं देवः प्रहस्य वदतां वरः ।
SP0160082 उवाच वचसा व्यास दिशः सर्वा विनादयन् ॥
SP0160091 त्वयाहं याचितः शक्ते स च ते संभविष्यति ।
SP0160092 त्वत्समः सर्ववेदज्ञस्त्वदीयो मुनिपुंगव ॥
SP0160101 बीजात्मा च तथोद्भूतः स्वयमेवाश्णकुरात्मना ।
SP0160102 बीजात्मना न भवति परिणामान्तरं गतः ॥
SP0160111 एवं स आत्मनात्मा वः संभूतोऽपत्यसंज्ञितः ।
SP0160112 स्वेनात्मना न भविता परिणामान्तरं गतः ॥
SP0160120 सनत्कुमार उवाच ।
SP0160121 एवमुक्त्वा तु तं देवः प्रहस्य च निरीक्ष्य च ।
SP0160122 जगाम सहसा योगी अदृश्यत्वमतिद्युतिः ॥
SP0160131 तस्मिन्गते महादेवे शक्तिस्तव पितामहः ।
SP0160132 वचस्तत्परिनिश्चिन्त्य एवमेवेत्यमन्यत ॥
SP0160141 अथ कालेऽतिमहति समतीते शुभव्रते ।
SP0160142 तपसा भावितश्चापि महताग्निसमप्रभः ।

SP0160143 अदृश्यन्त्यां महाप्रज्ञ आदधे गर्भमुत्तमम् ॥
SP0160151 तस्यामापन्नसत्त्वायां राजा कल्माषपादृषिम् ।
SP0160152 भक्षयामास संरब्धो रक्षसा हृतचेतनः ॥
SP0169999 इति स्कन्दपुराणे षोडशोऽध्यायः ॥

---

## स्कंदपुराण अध्याय १७

SP0170010 व्यास उवाच ।
SP0170011 कस्मात्स राजा तमृषिं चखाद तपसान्वितम् ।
SP0170012 रक्षसा स किमर्थं च हृतचेताभवन्नृपः ॥
SP0170020 सनत्कुमार उवाच ।
SP0170021 वसिष्ठयाज्यो राजासीन्नाम्ना मित्रसहः प्रभुः ।
SP0170022 सुदासपुत्रो बलवानिन्द्रचन्द्रसमद्युतिः ॥
SP0170031 तमागम्योचिवाञ्छक्तिश्चरिष्ये दीक्षितो व्रतम् ।
SP0170032 तत्र मे निशि राजेन्द्र सदैव पिशिताशनम् ॥
SP0170041 इहागतस्य यच्छस्व शुचि सर्वगुणान्वितम् ।
SP0170042 अप्रतीकारसंयुक्तमेकदैकान्त एव च ॥
SP0170051 एवमस्त्विति तेनोक्तो जगाम स महामनाः ।
SP0170052 अथास्यान्तर्हितं रक्षो नृपतेरभवत्तदा ।
SP0170053 नाज्ञापयत्तदा सूदं तस्यार्थे मुनिसत्तम ॥
SP0170061 गतेऽथ दिवसे तात संस्मृत्य प्रयतात्मवान् ।
SP0170062 सूदमाहूय चोवाच आर्तवत्स नराधिपः ॥
SP0170070 सौदास उवाच ।
SP0170071 मयामृतवसो प्रातर्गुरुपुत्रस्य धीमतः ।
SP0170072 पिशितं सम्प्रतिज्ञातं भोजनं निशि संस्कृतम् ।
SP0170073 तत्कुरुष्व तथा क्षिप्रं कालो नो नात्यगाद्यथा ॥
SP0170081 स एवमुक्तः प्रोवाच सूदोऽमृतवसुस्तदा ।
SP0170082 राजंस्त्वया नो नाख्यातं प्रागेव नरपुंगव ।
SP0170083 साम्प्रतं नास्ति पिशितं स्तोकमप्यभिकाङ्क्षितम् ॥
SP0170091 पिशितस्यैव चाल्पत्वाद्बहूनां चैव तद्भुजाम् ।
SP0170092 अमितस्य प्रदानाच्च न किंचिदवशिष्यते ॥
SP0170100 राजोवाच ।
SP0170101 जाने सर्वोपयोगं च जाने चादुष्टतां तव ।
SP0170102 जाने स्तोकं च पिशितं कार्यं चेदं तथाविधम् ।
SP0170103 मृग्यतां पिशितं क्षिप्रं लब्धव्यं यत्र मन्यसे ॥
SP0170110 सनत्कुमार उवाच ।
SP0170111 एवमुक्तोऽमृतवसुः प्रयत्नं महदास्थितः ।

SP0170112 पिशितं मृगयन्सम्यश्ण्नाप्यविन्दत कर्हिचित् ॥
SP0170121 यदा न लब्धवान्मांसं तदोवाच नराधिपम् ।
SP0170122 गत्वा निशि महाराजमिदं वचनमर्थवत् ॥
SP0170131 राजन्न पिशितं त्वस्ति पुरेऽस्मिञ्छुचि कर्हिचित् ।
SP0170132 मृगयन्परिखिन्नोऽस्मि शाधि किं करवाणि ते ॥
SP0170140 सनत्कुमार उवाच ।
SP0170141 स एवमुक्तः सूदेन तस्मिन्काले नराधिपः ।
SP0170142 नोवाच किंचित्तं सूदं तूष्णीमेव बभूव ह ॥
SP0170151 तदन्तरमभिप्रेक्ष्य विश्वामित्रसमीरितः ।
SP0170152 राक्षसो रुधिरो नाम संविवेश नराधिपम् ॥
SP0170161 रक्षसा स तदाविष्टो रुधिरेण दुरात्मना ।
SP0170162 उवाच सूदं शनकैः कर्णमूले महाद्युतिः ॥
SP0170171 गच्छ यत्किंचिदानीय मांसं मानुषमन्ततः ।
SP0170172 गार्दभं वाप्यथौष्ट्रं वा सर्वं संस्कर्तुमर्हसि ॥
SP0170181 किमसौ ज्ञास्यते रात्रौ त्वया भूयश्च संस्कृतम् ।
SP0170182 रसवद्गन्धवच्चैव क्षिप्रमेव समाचर ॥
SP0170190 सनत्कुमार उवाच ।
SP0170191 स एवमुक्तस्तेनाथ मानुषं मांसमाददे ।
SP0170192 राजापकारिणो व्यास मृतोत्सृष्टस्य कस्यचित् ॥
SP0170201 अथार्धरात्रसमये भास्कराकारवर्चसम् ।
SP0170202 शतानलसमप्रख्यमपश्यन्मुनिसत्तमम् ॥
SP0170211 स तमर्घ्येण पाद्येन आसनाग्र्यवरेण च ।
SP0170212 समर्चयित्वा विधिवदन्नमस्योपपादयत् ॥
SP0170221 स तदन्नं समानीतं समालभ्य महातपाः ।
SP0170222 चुकोप कुपितश्चाह पार्थिवं प्रदहन्निव ॥
SP0170230 शक्तिरुवाच ।
SP0170231 पार्थिवाधम विप्राणां भोजनं राक्षसोचितम् ।
SP0170232 न दीयते विधिज्ञेन त्वं तु मामवमन्यसे ॥
SP0170241 यस्मात्त्वं राक्षसमिदं मह्यं दित्ससि भोजनम् ।
SP0170242 तस्मात्त्वं कर्मणा तेन पुरुषादो भविष्यसि ॥
SP0170250 सनत्कुमार उवाच ।
SP0170251 एवमुक्तस्तु तेजस्वी राजा संचिन्त्य तत्तदा ।
SP0170252 उवाच क्रोधरक्ताक्षो राक्षसाविष्टचेतनः ॥
SP0170261 पुरुषादो भवेत्येवं मामवोचद्भवान्यतः ।
SP0170262 ततस्त्वां भक्षयिष्यामि भ्रातृभिः सहितं द्विज ॥
SP0170271 भक्षयित्वा विशुद्ध्यर्थं मुक्तशापस्ततः परम् ।

SP0170272 चरिष्यामि तपः शुद्धं संयम्येन्द्रियसंहतिम् ।
SP0170273 पित्रा तवाभ्यनुज्ञातः स्वर्गे वत्स्ये यथेप्सितम् ॥
SP0179999 इति स्कन्दपुराणे सप्तदशमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय १८

SP0180010 सनत्कुमार उवाच ।
SP0180011 ततः स राजा स्वं राज्यमुत्सृज्य सह भार्यया ।
SP0180012 वनं विवेश तत्राभूत्पुरुषादो महाबलः ॥
SP0180021 सोऽभक्षयत तत्राग्रे शक्तिमेव महामुनिम् ।
SP0180022 ततो भ्रातृशतं तस्य वसिष्ठस्यैव पश्यतः ॥
SP0180031 ततः पुत्रवधं घोरं दृष्ट्वा ब्रह्मसुतः प्रभुः ।
SP0180032 नोत्ससर्ज तदा क्रोधं वसिष्ठः कौशिकं प्रति ।
SP0180033 पुत्रशोकेन महता भृशमेवान्वकीर्यत ॥
SP0180041 स बद्धवा महतीं कण्ठे शिलां ब्रह्मसुतः प्रभुः ।
SP0180042 नद्यामात्मानमुत्सृज्य शतधा साद्रवद्भयात् ।
SP0180043 शतद्रूरिति तां प्राहुर्मुनयः संशितव्रताः ॥
SP0180051 पुनः पाशैर्दृढैर्बद्धवा अन्यस्यामसृजद्वशी ।
SP0180052 तस्यां विपाशः संवृत्तो विपाशा साभवत्ततः ॥
SP0180061 ततोऽटवीं समासाद्य निराहारो जितेन्द्रियः ।
SP0180062 वायुभक्षस्तदा तस्थौ स्वं देहं परितापयन् ॥
SP0180071 अथ शुश्राव वेदानां ध्वनिमेकस्य सुस्वरम् ।
SP0180072 अधीयानस्य तत्राशु ध्यानमेवान्वपद्यत ॥
SP0180081 अथैनं चारुसर्वाङ्गी पीनोन्नतपयोधरा ।
SP0180082 उपतस्थेऽग्रतः पत्नी शक्तेर्दीनाननेक्षणा ॥
SP0180091 तामुवाच कुतस्त्वं वै कस्यैष श्रूयते ध्वनिः ।
SP0180092 सोवाच दीनया वाचा रुदती श्वशुरं तदा ॥
SP0180100 अदृश्यन्त्युवाच ।
SP0180101 यदैव सुतदुःखेन निर्गतोऽस्याश्रमाद्गुरो ।
SP0180102 तदाप्रभृत्येवादृश्या भगवन्तमनुव्रता ॥
SP0180111 अधीयानस्य चैवायं ध्वनिः पुत्रस्य ते विभो ।
SP0180112 उदरस्थस्य ते सूनोर्मा दुःखे त्वं मनः कृथाः ॥
SP0180120 सनत्कुमार उवाच ।
SP0180121 इदानीमस्ति मे वत्से जीविताशेति सोऽब्रवीत् ।
SP0180122 क्षान्तिं धृतिं च संस्थित्य प्रययावाश्रमं मुनिः ॥
SP0180131 तदाश्रमपदं गच्छन्पथि राजानमैक्षत ।
SP0180132 वसारुधिरदिग्धाङ्गं सौदासं रक्तलोचनम् ॥

SP0180141 अभिद्रवन्तं वेगेन मन्त्रैरस्तम्भयन्मुनिः ।
SP0180142 ततोऽस्य निर्गतः कायाद्रक्षः परमदारुणः ॥
SP0180151 उवाच चैनं दुष्टात्मन्दहेयं त्वां सबान्धवम् ।
SP0180152 दग्धेन च त्वया किं मे गच्छ मुक्तोऽसि दुर्मते ॥
SP0180161 ततः स मुक्तो दीनात्मा राक्षसः क्रूरकर्मकृत् ।
SP0180162 प्रणम्य शिरसा भीतो जगाम कुशिकान्तिकम् ॥
SP0180171 गते निशाचरे राजा प्रणम्य शिरसा मुनिम् ।
SP0180172 प्रसादयामास तदा स चोवाचेदमर्थवत् ॥
SP0180181 न दोषस्तव राजेन्द्र रक्षसाधिष्ठितस्य वै ।
SP0180182 कृतान्तेन हताः पुत्रा निमित्तं तत्र राक्षसः ॥
SP0180191 प्रशाधि राज्यं राजेन्द्र पितृपैतामहं विभो ।
SP0180192 ब्रूहि किं वा प्रियं तेऽद्य करोमि नरपुंगव ॥
SP0180200 राजोवाच ।
SP0180201 इच्छामि भगवन्पुत्रं त्वयोत्पादितमच्युत ।
SP0180202 देव्यामस्यां महासत्त्वं तत्कुरुष्व मम प्रियम् ॥
SP0180210 सनत्कुमार उवाच ।
SP0180211 एवमस्त्वित्यथोक्त्वासौ तस्यां पत्न्यां महाव्रतः ।
SP0180212 पुत्रं च शोणकं नाम जनयामास निर्वृतः ॥
SP0180221 तं शोणकं ततो राज्ये स्वं पुत्रमभिषिच्य सः ।
SP0180222 जगाम वनमेवाशु सभार्यस्तपसि स्थितः ॥
SP0180231 वसिष्ठस्यापि कालेन शक्तेः पुत्रः प्रतापवान् ।
SP0180232 अदृश्यन्त्यां समभवत्पुत्रो नाम्ना पराशरः ॥
SP0180241 वसिष्ठं तु तदा धीमांस्तातमेवाभ्यमन्यत ।
SP0180242 तात तातेति च मुहुर्व्याजहार पितुर्गुरुम् ॥
SP0180251 ततः कदाचिद्विज्ञाय भक्षितं रक्षसा शुचिम् ।
SP0180252 पितरं तपसा मन्त्रैरीजे रक्षःक्रतौ तदा ॥
SP0180261 तत्र कोटीः स पञ्चाशद्रक्षसां क्रूरकर्मणाम् ।
SP0180262 जुहावाग्नौ महातेजास्ततो ब्रह्माभ्यगादद्रुतम् ॥
SP0180271 सुतमभ्येत्य सम्पूज्य वसिष्ठसहितः प्रभुः ।
SP0180272 ऋषिभिर्दैवतैश्चैव इदमाह पराशरम् ॥
SP0180280 ब्रह्मोवाच ।
SP0180281 देवतास्ते पतन्ति स्म यज्ञैर्मन्त्रपुरस्कृतैः ।
SP0180282 अष्टमं स्थानमेतद्धि देवानामाद्यमीदृशम् ॥
SP0180290 पराशर उवाच ।
SP0180291 सह देवैरहं सर्वा/ल्लोकान्धक्ष्यामि पावकैः ।
SP0180292 दग्ध्वान्यान्प्रथयिष्यामि तत्र लोकान्न संशयः ॥

SP0180300 सनत्कुमार उवाच ।
SP0180301 तस्यैवं गर्वितं वाक्यं श्रुत्वा देवः पितामहः ।
SP0180302 उवाच श्लक्ष्णया वाचा सान्त्वयंस्तमिदं वचः ॥
SP0180310 पितामह उवाच ।
SP0180311 कृतमेतन्न संदेहो यथा ब्रूषे महामते ।
SP0180312 क्षन्तव्यं सर्वमेतत्तु अस्मत्प्रियचिकीर्षया ॥
SP0180321 यैस्ते पिता महाभाग भक्षितः सह सोदरैः ।
SP0180322 त एवाग्नौ च होतव्या विश्वामित्रस्य पश्यतः ।
SP0180323 अन्येषां स्वस्ति सर्वत्र देवानां सह राक्षसैः ॥
SP0180331 तस्य संकल्पसंतप्तो मन्युमूलमुदाहरत् ।
SP0180332 वसिष्ठस्य महाभाग त्वं निवारय पुत्रक ॥
SP0180341 देवाः प्राञ्जलयः सर्वे प्रणेमुस्ते महामुनिम् ।
SP0180342 ऋषयश्चैव ते सर्वे वाग्भिस्तुष्टुविरे तदा ॥
SP0180351 ततस्तेषां महातेजा वचांसि प्रत्यपूजयत् ।
SP0180352 विश्वामित्रस्य मिषत इदं प्रोवाच सुस्वरम् ॥
SP0180361 य एषां ब्राह्मणो वापि क्षत्रियो वा दुरात्मवान् ।
SP0180362 रक्षसां पक्षमास्थाय प्रतीकारं करिष्यति ॥
SP0180371 तमप्यत्रापि संक्रुद्धस्तपोयोगबलान्वितः ।
SP0180372 विहत्य तपसो योगाद्धोष्ये दीप्ते विभावसौ ॥
SP0180380 सनत्कुमार उवाच ।
SP0180381 ततो देवाः सगन्धर्वाः पितामहपुरःसराः ।
SP0180382 प्रभावं तस्य तं ज्ञात्वा पराशरमपूजयन् ॥
SP0180391 हुतेषु च ततस्तेषु राक्षसेषु दुरात्मसु ।
SP0180392 संजहार ततः सत्त्रं ब्रह्मणोऽनुमते तदा ॥
SP0180400 सनत्कुमार उवाच ।
SP0180401 य इमं श्राद्धकाले वा दैवे कर्मणि वा द्विजान् ।
SP0180402 श्रावयीत शुचिर्भूत्वा न तं हिंसन्ति राक्षसाः ॥
SP0180411 पराशरस्येदमदीनसम्भवं विशुद्धवाक्कर्मविधानसम्भवम् ।
SP0180412 निशाम्य विप्रः कुलसिद्धिसम्भवं न राक्षसं गच्छति योनिसम्भवम् ॥
SP0189999 इति स्कन्दपुराणेऽष्टादशमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय १९

SP0190010 सनत्कुमार उवाच ।
SP0190011 एवं तव पिता व्यास रक्षःसत्त्रं समाहरत् ।
SP0190012 समापयित्वा च पुनस्तपस्तेपे च भास्वरम् ॥
SP0190021 तमागत्य वसिष्ठस्तु तपसा भास्करद्युतिम् ।

SP0190022 उवाच प्रीतिसम्पन्नमिदमर्थवदव्ययः ॥
SP0190030 वसिष्ठ उवाच ।
SP0190031 पितरः पुत्रकामा वै तपः कृत्वातिदुश्चरम् ।
SP0190032 पुत्रमुत्पादयन्ति स्म तपोज्ञानसमन्वितम् ॥
SP0190041 अयं नः संततिं चैव ज्ञानवांस्तपसान्वितः ।
SP0190042 करिष्यति गतिं चैव इति वेदविदो विदुः ॥
SP0190051 स त्वं तपोन्वितश्चैव ज्ञानवान्यशसान्वितः ।
SP0190052 पुत्रः पुत्रवतां श्रेष्ठो विहीनः प्रजया विभो ॥
SP0190061 तस्मात्पित्‌णामानृण्यं गच्छ व्रतवतां वर ।
SP0190062 सुतमुत्पादय क्षिप्रमधिकं सममेव वा ॥
SP0190070 सनत्कुमार उवाच ।
SP0190071 स एवमुक्तस्तेजस्वी वसिष्ठेनामितात्मना ।
SP0190072 मैनाकं पर्वतं प्राप्य तपस्तेपे सुदुश्चरम् ॥
SP0190081 तस्य कालेन महता तपसा भावितस्य तु ।
SP0190082 उमापतिर्वरं प्रादात्स च वव्रे सुतं शुभम् ॥
SP0190091 स लब्धवर आगम्य ययाचे पुत्रकारणात् ।
SP0190092 क्षेत्रं सुपरिशुद्धं च स्वपुत्रो यत्र सम्भवेत् ॥
SP0190101 सम्भ्रमन्दाशराजस्य दुहितृत्वमुपागताम् ।
SP0190102 पितृकन्यां ततः कालीमपश्यद्दिव्यरूपिणीम् ॥
SP0190111 मत्सीगर्भसमुत्पन्नां वसोर्बीजाशनात्पुरा ।
SP0190112 अद्रिकामप्सरःश्रेष्ठां ब्रह्मतेजोमयीं शुभाम् ॥
SP0190121 तस्यां स जनयामास वरं दत्त्वा महातपाः ।
SP0190122 भवन्तं तपसां योनिं श्रौतस्मार्तप्रवर्तकम् ॥
SP0190131 तव पुत्रोऽभवच्चापि शुको योगविदां वरः ।
SP0190132 तस्य पुत्राश्च चत्वारः कन्या चैका सुमध्यमा ॥
SP0190140 व्यास उवाच ।
SP0190141 कथं वैरं समभवद्विश्वामित्रवसिष्ठयोः ।
SP0190142 कथं चापगतं भूय एतदिच्छामि वेदितुम् ॥
SP0190150 सनत्कुमार उवाच ।
SP0190151 पराशरे तु गर्भस्थे विप्रत्वं गाधिजे गते ।
SP0190152 सरस्वत्यां कुरुक्षेत्रे द्वयोरप्याश्रमौ तयोः ॥
SP0190161 तत्र वैरमनुस्मृत्य विश्वामित्रेण धीमता ।
SP0190162 मिषतस्तु वसिष्ठस्य हतं पुत्रशतं रुषा ॥
SP0190171 मुनिरप्याह तत्रासौ विश्वामित्रः प्रतापवान् ।
SP0190172 सरस्वतीमथैकान्ते वसिष्ठं मे महापगे ।
SP0190173 स्रोतसा महताक्षिप्य स्नायमानमिहानय ॥

SP0190181 सैवमुक्ता तु तं गत्वा वसिष्ठं प्राह दुःखिता ।
SP0190182 यदुक्तवांस्तु गाधेयः स चोवाच महानदीम् ॥
SP0190191 एवं कुरु महाभागे मां नयस्व यथेप्सितम् ।
SP0190192 मा ते क्रूरः स गाधेयः शापं दद्यात्सुदुस्तरम् ॥
SP0190200 सनत्कुमार उवाच ।
SP0190201 गाधेयस्य ततः सा तु जुह्वतोऽग्निं दिवाकरे ।
SP0190202 मध्यं प्राप्तेऽनयद्वेगाद्वसिष्ठं स्रोतसा शुभा ॥
SP0190211 तं दृष्ट्वापहृतं व्यास स्रोतसा मुनिसत्तमम् ।
SP0190212 उवाच च्छद्मना यस्माद्वेगेनापहृतस्त्वया ।
SP0190213 तस्मात्त्वं कर्मणानेन सासृक्तोया भविष्यसि ॥
SP0190221 विश्वामित्रेण सा शप्ता नदी लोकसुखप्रदा ।
SP0190222 अवहद्रुधिरं चैव मांसमेदस्तथैव च ॥
SP0190231 अथ तीर्थप्रसश्णगेन मुनिभिः समुपागतैः ।
SP0190232 अनुग्रहः कृतस्तस्या येन स्वच्छजलाभवत् ॥
SP0190241 महतस्तपसः शक्त्या कालेन महता तदा ।
SP0190242 वसिष्ठस्य च तां क्षान्तिं ज्ञात्वा स ऋषिपुंगवः ॥
SP0190251 विश्वामित्रो महातेजा वसिष्ठे वैरमत्यजत् ।
SP0190252 एवं तौ वैरमन्योन्यं जहतुर्मुनिसत्तमौ ॥
SP0190260 सनत्कुमार उवाच ।
SP0190261 य इमं शृणुयान्नित्यं ब्राह्मणाञ्छ्रावयीत वा ।
SP0190262 स दुस्तराणि दुर्गाणि तरत्यश्रान्तपौरुषः ॥
SP0190271 ह्रीपौरुषौदार्यविहारसत्त्वैः समन्वितः सोज्ज्वलचारुवेषः ।
SP0190272 भवेच्च सर्वामरराजतुल्यस्त्रिपिष्टपे क्रीडति चेच्छया स्वयम् ॥
SP0190281 एवं तदभवद्व्यास विश्वामित्रवसिष्ठयोः ।
SP0190282 वैरं समाप्तं लोकानां हितार्थं पुनरेव च ॥
SP0199999 इति स्कन्दपुराणे ऊनविंशतितमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय २०

SP0200010 व्यास उवाच ।
SP0200011 उमाहरौ तु देवेशौ चक्रतुर्यच्च संगतौ ।
SP0200012 तन्मे सर्वमशेषेण कथयस्व महामुने ॥
SP0200020 सनत्कुमार उवाच ।
SP0200021 उमाहरौ तु संगम्य परस्परमनिन्दितौ ।
SP0200022 शालश्णकस्यान्वये विप्रं युयुजाते वरेण ह ॥
SP0200031 स चाप्ययोनिजः पुत्र आराध्य परमेश्वरम् ।
SP0200032 रुद्रेण समतां लब्ध्वा महागणपतिर्बभौ ॥

SP0200040 व्यास उवाच ।
SP0200041 कथं नन्दी समुत्पन्नः कथं चाराध्य शंकरम् ।
SP0200042 समानत्वमगाच्छम्भोः प्रतीहारत्वमेव च ॥
SP0200050 सनत्कुमार उवाच ।
SP0200051 अभूदृषिः स धर्मात्मा शिलादो नाम वीर्यवान् ।
SP0200052 तस्याभूच्छिलकैर्वृत्तिः शिलादस्तेन सोऽभवत् ॥
SP0200061 अपश्यल्लम्बमानांस्तु गर्तायां स पितॄन्द्विजः ।
SP0200062 विच्छिन्नसंततीन्घोरं निरयं वै प्रपेतुषः ॥
SP0200071 तैरुक्तोऽपत्यकामैस्तु देवं लोकेशमव्ययम् ।
SP0200072 आराधय महादेवं सुतार्थं द्विजसत्तम ॥
SP0200081 तस्य वर्षसहस्रेण तप्यमानस्य शूलधृक् ।
SP0200082 शर्वः सोमो गणवृतो वरदोऽस्मीत्यभाषत ॥
SP0200091 तं दृष्ट्वा सोममीशेशं प्रणतः पादयोर्विभोः ।
SP0200092 हर्षगद्गदया वाचा तुष्टाव विबुधेश्वरम् ॥
SP0200101 नमः परमदेवाय महेशाय महात्मने ।
SP0200102 स्रष्ट्रे सर्वसुरेशानां ब्रह्मणः पतये नमः ॥
SP0200111 नमः कामाङ्गनाशाय योगसम्भवहेतवे ।
SP0200112 नमः पर्वतवासाय ध्यानगम्याय वेधसे ॥
SP0200121 ऋषीणां पतये नित्यं देवानां पतये नमः ।
SP0200122 वेदानां पतये चैव योगिनां पतये नमः ॥
SP0200131 प्रधानाय नमो नित्यं तत्त्वायामरसंज्ञिणे ।
SP0200132 वरदाय च भक्तानां नमः सर्वगताय च ॥
SP0200141 तन्मात्रेन्द्रियभूतानां विकाराणां गुणैः सह ।
SP0200142 स्रष्ट्रे च पतये चैव नमश्च प्रभविष्णवे ॥
SP0200151 जगतः पतये चैव जगत्स्रष्ट्रे नमः सदा ।
SP0200152 प्रकृतेः पतये नित्यं पुरुषात्परगामिने ॥
SP0200161 ईश्वराय नमो नित्यं योगगम्याय रंहसे ।
SP0200162 संसारोत्पत्तिनाशाय सर्वकामप्रदाय च ॥
SP0200171 शरण्याय नमो नित्यं नमो भस्माङ्गरागिणे ।
SP0200172 नमस्तेऽयोग्रहस्ताय तेजसां पतये नमः ॥
SP0200181 सूर्यानिलहुताशाम्बुचन्द्राकाशधराय च ।
SP0200182 स्थिताय सर्वदा नित्यं नमस्त्रैलोकवेधसे ॥
SP0200191 स्तोतव्यस्य कुतो देव विश्रामस्तव विद्यते ।
SP0200192 यदा हेतुस्त्वमेवास्य जगतः स्थितिनाशयोः ॥
SP0200201 अशरण्यस्य देवेश त्वत्तश्च शरणार्थिनः ।
SP0200202 प्रसादं परमालम्ब्य वरदो भव विश्वकृत् ॥

SP0200210 सनत्कुमार उवाच ।
SP0200211 यः स्तोत्रमेतदखिलं पठते द्विजन्मा प्रातः शुचिर्नियमवान्पुरतो द्विजानाम् ।
SP0200212 तं ब्रह्मराक्षसनिशाचरभूतयक्षा हिंसन्ति नो द्विपदपन्नगपूतनाश्च ॥
SP0200221 ततः स भगवान्देवः स्तूयमानः सहोमया ।
SP0200222 उवाच वरदोऽस्मीति ब्रूहि यत्ते मनोगतम् ॥
SP0200231 तमेवंवादिनं देवं शिलादोऽभ्यर्चयत्तदा ।
SP0200232 उवाच चेदं देवेशं स वाचा सज्जमानया ॥
SP0200241 भगवन्यदि तुष्टोऽसि यदि देयो वरश्च मे ।
SP0200242 इच्छाम्यात्मसमं पुत्रं मृत्युहीनमयोनिजम् ॥
SP0200251 एवमुक्तस्ततो देवः प्रीयमाणस्त्रिलोचनः ।
SP0200252 एवमस्त्विति तं प्रोच्य तत्रैवान्तरधीयत ॥
SP0200261 गते तस्मिन्महेष्वासे ऋषिः परमपूजितः ।
SP0200262 स्वमाश्रममुपागम्य ऋषिभ्योऽकथयत्ततः ॥
SP0200271 तैः प्रशस्तस्ततश्चैव कालेन मुनिसत्तम ।
SP0200272 यियक्षुर्यज्ञभूमिं स्वां लाश्णगलेन चकर्ष ताम् ॥
SP0200281 तस्यां तु कृष्यमाणायां सीतायां तत्समुत्थितः ।
SP0200282 संवर्तकानलप्रख्यः कुमारः प्रत्यदृश्यत ॥
SP0200291 स तं दृष्ट्वा तथोद्भूतं कुमारं दीप्ततेजसम् ।
SP0200292 राक्षसोऽयमिति ज्ञात्वा भयान्नोपससार तम् ॥
SP0200301 कुमारोऽपि तथोद्भूतः पितरं दीप्ततेजसम् ।
SP0200302 उपासर्पत दीनात्मा तात तातेति चाब्रवीत् ॥
SP0200311 स तातेत्युच्यमानोऽपि यदा तं नाभ्यनन्दत ।
SP0200312 ततो वायुस्तमाकाशे शिलादं प्राह सुस्वरम् ॥
SP0200320 वायुरुवाच ।
SP0200321 शालश्णकायन पुत्रस्ते योऽसौ देवेन शम्भुना ।
SP0200322 अयोनिजः पुरा दत्तः स एष प्रतिनन्दय ॥
SP0200331 यस्मान्नन्दीकरस्तेऽयं सदैव द्विजसत्तम ।
SP0200332 तस्मान्नन्दीति नाम्नायं भविष्यति सुतस्तव ॥
SP0200340 सनत्कुमार उवाच ।
SP0200341 ततः स वायुवचनान्नन्दिनं परिषस्वजे ।
SP0200342 गृहीत्वा चाश्रमं स्वेन सोऽनयत्तुष्टिवर्धनम् ।
SP0200343 चूडोपनयनादीनि कर्माण्यस्य चकार सः ॥
SP0200351 कृत्वा चाध्यापयामास वेदान्साश्णगानशेषतः ।
SP0200352 आयुर्वेदं धनुर्वेदं गान्धर्वं शब्दलक्षणम् ॥
SP0200361 हस्तिनां चरितं यच्च नरनार्योश्च लक्षणम् ।
SP0200362 शिल्पानि चैव सर्वाणि निमित्तज्ञानमेव च ॥

SP0200371 भूतग्रामचिकित्सां च मात्ृणां चरितं च यत् ।
SP0200372 भुजंगानां च सर्वेषां यच्च किंचिद्विचेष्टितम् ।
SP0200373 अब्दैरधीतवान्सर्वं व्यास पञ्चभिरेव च ॥
SP0200381 दक्षः शुचिरदीनात्मा प्रियवागनसूयकः ।
SP0200382 सर्वलोकप्रियो नित्यं मनोनयननन्दनः ॥
SP0200391 तस्याथ सप्तमे वर्षे ऋषी दिव्यौ तपोधनौ ।
SP0200392 आश्रमं समनुप्राप्तौ शिलादस्य महौजसौ ॥
SP0200401 तावभ्यर्च्य यथान्यायं शिलादः सुमहातपाः ।
SP0200402 सुखासीनौ समालक्ष्य आसने परमार्चितौ ॥
SP0200411 मित्रावरुणनामानौ तपोयोगबलान्वितौ ।
SP0200412 अभिज्ञौ सर्वभूतानां त्रैलोक्ये सचराचरे ॥
SP0200421 ताभ्यामनुज्ञातश्चैव निषसाद वरासने ।
SP0200422 उपविष्टस्ततः प्रीत इष्टाभिर्वाग्भिरस्तुवत् ॥
SP0200431 ताभ्यां पृष्टश्च कच्चित्ते पुत्रस्तुष्टिप्रदः शुभः ।
SP0200432 स्वाध्यायनियतः कच्चित्कच्चिद्धर्मस्य संततिः ॥
SP0200441 कच्चिन्न वृद्धान्बालो न गुरून्वाप्यवमन्यते ।
SP0200442 कच्चिन्नियमवांश्चैव कच्चित्तुष्टिप्रदः सताम् ॥
SP0200451 स एवमुक्तस्तेजस्वी शिलादः पुत्रवत्सलः ।
SP0200452 उवाच गुणवान्सम्यक्कुलवंशविवर्धनः ॥
SP0200461 तमाहूय स तुष्ट्या तु पुत्रं नन्दिनमच्युतम् ।
SP0200462 तयोः पादेषु शिरसा अपातयत नन्दिनम् ॥
SP0200471 तौ तु तस्याशिषं देवौ प्रयुशण्क्तो धर्मनित्यताम् ।
SP0200472 गुरुशुश्रूषणे भावं लोकांश्चैव तथाक्षयान् ॥
SP0200480 सनत्कुमार उवाच ।
SP0200481 शिलादस्तामथालक्ष्य आशिषं देवयोस्तदा ।
SP0200482 विसृज्य नन्दिनं भीतः सोऽपृच्छदृषिसत्तमौ ॥
SP0200490 शिलाद उवाच ।
SP0200491 भगवन्तावृषी सत्यौ गतिज्ञौ सर्वदेहिनाम् ।
SP0200492 किमर्थं मम पुत्रस्य दीर्घमायुरुभावपि ।
SP0200493 प्रयुक्तवन्तौ सम्यक्तु नाशिषं मुनिसत्तमौ ॥
SP0200500 मित्रावरुणावूचतुः ।
SP0200501 तवैष तनयस्तात अल्पायुः सर्वसंमतः ।
SP0200502 अतोऽन्यद्वर्षमेकं वै जीवितं धारयिष्यति ॥
SP0200510 सनत्कुमार उवाच ।
SP0200511 ततः स शोकसंतप्तो न्यपतद्भुवि दुःखितः ।
SP0200512 विसृज्य ऋषिशार्दूलावेकाकी विललाप च ॥

SP0200521 तस्य शोकाद्विलपतः स्वरं श्रुत्वा सुतः शुभः ।
SP0200522 नन्द्यागात्तमथापश्यत्पितरं दुःखितं भृशम् ॥
SP0200530 नन्द्युवाच ।
SP0200531 केन त्वं तात दुःखेन दूयमानः प्ररोदिषि ।
SP0200532 दुःखं ते कुत उद्भूतं ज्ञातुमिच्छाम्यहं पितः ॥
SP0200540 शिलाद उवाच ।
SP0200541 पुत्र त्वं किल वर्षेण जीवितं सम्प्रहास्यसि ।
SP0200542 ऊचतुस्तावृषीत्येवं ततो मां कृच्छ्रमाविशत् ॥
SP0200550 नन्द्युवाच ।
SP0200551 सत्यं देवऋषी तात न तावनृतमूचतुः ।
SP0200552 तथापि तु न मृत्युर्मे प्रभविष्यति मा शुचः ॥
SP0200560 शिलाद उवाच ।
SP0200561 किं तपः किं परिज्ञानं को योगः कः श्रमश्च ते ।
SP0200562 येन त्वं मृत्युमुद्युक्तं वञ्चयिष्यसि कथ्यताम् ॥
SP0200570 नन्द्युवाच ।
SP0200571 न तात तपसा मृत्युं वञ्चयिष्ये न विद्यया ।
SP0200572 महादेवप्रसादेन मृत्युं जेष्यामि नान्यथा ॥
SP0200581 द्रक्ष्यामि शंकरं देवं ततो मृत्युर्न मे भवेत् ।
SP0200582 नष्टे मृत्यौ त्वया सार्धं चिरं वत्स्यामि निर्वृतः ॥
SP0200590 शिलाद उवाच ।
SP0200591 मया वर्षसहस्रेण तपस्तप्त्वा सुदुश्चरम् ।
SP0200592 महादेवः पुरा दृष्टो लब्धस्त्वं मे यतः सुतः ॥
SP0200601 भवांस्तु वर्षेणैकेन तपसा नातिभावितः ।
SP0200602 कथं द्रष्टा महादेवमेतदिच्छामि वेदितुम् ॥
SP0200610 नन्द्युवाच ।
SP0200611 न तात तपसा देवो दृश्यते न च विद्यया ।
SP0200612 शुद्धेन मनसा भक्त्या दृश्यते परमेश्वरः ॥
SP0200621 त्वया विसृष्टो गत्वाहमचिरेण त्रिलोचनम् ।
SP0200622 द्रष्टा तात न संदेहो विसृजाशु ततस्तु माम् ॥
SP0200631 तिष्ठन्तं मां यमोऽभ्येत्य पश्यतस्तेऽभिसंमतम् ।
SP0200632 न हिंसति तथा तस्मादितस्तात व्रजाम्यहम् ॥
SP0200641 तिष्ठन्तं वा शयानं वा धावन्तं पतितं तथा ।
SP0200642 न प्रतीक्षति वै मृत्युरिति बुद्धवा शमं व्रज ॥
SP0200651 अवतीर्य जलं दिव्यं भावं शुद्धं समास्थितः ।
SP0200652 अभ्यस्य रौद्रमध्यायं ततो द्रक्ष्यामि शंकरम् ॥
SP0200661 जपतश्चापि युक्तस्य रुद्रभावार्पितस्य च ।

SP0200662 न मृत्युकाला बह्वः करिष्यन्ति मम व्यथाम् ॥
SP0200670 सनत्कुमार उवाच ।
SP0200671 तमेवंवादिनं मत्वा ब्रुवाणं शुद्धया गिरा ।
SP0200672 व्यसर्जयददीनात्मा कृच्छ्रात्पुत्रं महातपाः ॥
SP0200681 अभिवन्द्य पितुः पादौ शिरसा स महायशाः ।
SP0200682 प्रदक्षिणं समावृत्य सम्प्रतस्थेऽतिनिश्चितः ॥
SP0200691 अभिवाद्य ऋषीन्सर्वान्स दिदृक्षुरुदारधीः ।
SP0200692 मुनिः स देवमगमत्प्रणतार्तिहरं हरम् ॥
SP0209999 इति स्कन्दपुराणे विंशतितमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय २१

SP0210010 सनत्कुमार उवाच ।
SP0210011 निर्गतोऽथ ततो नन्दी जगाम सरितां वराम् ।
SP0210012 भुवनामिति विख्यातां सर्वलोकसुखावहाम् ॥
SP0210021 तां प्रविश्य ततो धीमानेकाग्रो ह्रदमास्थितः ।
SP0210022 स जजाप तदा रुद्रान्मृत्योर्भीतः समाहितः ॥
SP0210031 जपता तेन तत्रैव तत्परेण तदाशिषा ।
SP0210032 कोटिरेका यदा जप्ता तदा देवस्तुतोष ह ॥
SP0210041 तमागत्याह भगवाञ्छर्व उग्रः कपर्दिमान् ।
SP0210042 नन्दिंस्तुष्टोऽस्मि भद्रं ते वरं वृणु यथेप्सितम् ॥
SP0210051 उवाच प्रणतो भूत्वा प्रणतार्तिहरं हरम् ।
SP0210052 द्वितीयां जप्तुमिच्छामि कोटिं भगवतां विभो ।
SP0210053 एवमस्त्विति देवोऽपि प्रोच्यागच्छद्यथागतम् ॥
SP0210060 सनत्कुमार उवाच ।
SP0210061 सोऽवतीर्य ततो भूयः प्रयतात्मा तथैव ह ।
SP0210062 जजाप कोटिमन्यां तु रुद्रमेवानुचिन्तयन् ॥
SP0210071 द्वितीयायां ततः कोट्यां सम्पूर्णायां वृषध्वजः ।
SP0210072 अभ्याजगाम तं चैव वरदोऽस्मीत्यभाषत ॥
SP0210081 स प्राह भगवन्कोटिं तृतीयामपि कालहन् ।
SP0210082 जप्तुमिच्छामि देवेश त्वत्प्रसादादहं विभो ॥
SP0210091 एवमस्त्विति भूयोऽपि भगवान्प्रत्युवाच ह ।
SP0210092 उक्त्वा जगाम स्वं वेश्म देव्या सह महाद्युतिः ॥
SP0210101 ततस्तृतीयां रुद्राणां कोटिमन्यां जजाप ह ।
SP0210102 युगान्तादित्यसंकाशस्ततः समभवद्द्विजः ॥
SP0210111 तस्य कोटीत्रये व्यास समाप्ते ज्वलनत्विषः ।
SP0210112 सोमः सह गणैर्देवस्तं देशमुपचक्रमे ॥

SP0210121 स तं करेण संगृह्य उद्धृत्य सलिलाच्च ह ।
SP0210122 संमृजानोऽग्रहस्तेन नन्दिनं कालहाब्रवीत् ॥
SP0210130 देव उवाच ।
SP0210131 शैलादे वरदोऽहं ते तपसानेन तोषितः ।
SP0210132 साधु जप्तं त्वया धीमन्ब्रूहि यत्ते मनोगतम् ॥
SP0210140 शैलादिरुवाच ।
SP0210141 जपेयं कोटिमन्यां तु भूयोऽपि तव तेजसा ।
SP0210142 वरमेतं वृणे देव यदि तुष्टोऽसि मे विभो ॥
SP0210150 भगवानुवाच ।
SP0210151 किं ते जप्तेन भूयोऽपि तुष्टोऽस्मि तव सर्वथा ।
SP0210152 यद्यत्त्वं वृणुषे कामं सर्वं तत्प्रददानि ते ॥
SP0210161 ब्रह्मत्वमथ विष्णुत्वमिन्द्रत्वमथ वायुताम् ।
SP0210162 आदित्यो भव रुद्रो वा ब्रूहि किं वा ददानि ते ॥
SP0210170 सनत्कुमार उवाच ।
SP0210171 स एवमुक्तो देवेन शिरसा पादयोर्नतः ।
SP0210172 तुष्टाव पुरकामाश्ङ्गक्रतुपर्वतनाशनम् ॥
SP0210180 नन्द्युवाच ।
SP0210181 नमो देवातिदेवाय महादेवाय वै नमः ।
SP0210182 नमः कामाश्ङ्गनाशाय नीलकण्ठाय वै नमः ॥
SP0210191 नमस्तुषितनाशाय त्रैलोक्यदहनाय च ।
SP0210192 नमः कालोग्रदण्डाय उग्रदण्डाय वै नमः ॥
SP0210201 नमो नीलशिखण्डाय सहस्रशिरसे नमः ।
SP0210202 सहस्रपाणये चैव सहस्रचरणाय च ॥
SP0210211 सर्वतःपाणिपादाय सर्वतोक्षिमुखाय च ।
SP0210212 सर्वतःश्रुतये चैव सर्वमावृत्य तिष्ठते ॥
SP0210221 नमस्ते रुक्मवर्णाय तथैवातीन्द्रियाय च ।
SP0210222 नमः कनकलिश्ङ्गाय सर्वलिश्ङ्गाय वै नमः ॥
SP0210231 नमश्चन्द्रार्कवर्णाय योगेशायाजिताय च ।
SP0210232 पिनाकपाणये चैव शूलमुद्गरपाणये ॥
SP0210241 गदिने खड्गिने चैव परश्वधधराय च ।
SP0210242 रथिने वर्मिणे चैव महेष्वासाय वै नमः ॥
SP0210251 नमस्त्रिशूलहस्ताय उग्रदण्डधराय च ।
SP0210252 नमो गणाधिपतये रुद्राणां पतये नमः ॥
SP0210261 नमः सहस्रनेत्राय शतनेत्राय वै नमः ।
SP0210262 आदित्यानां च पतये वसूनां पतये नमः ॥
SP0210271 नमः पृथिव्याः पतये आकाशपतये नमः ।

SP0210272 नमः स्वर्लोकपतये उमायाः पतये नमः ॥
SP0210281 नमो योगाधिपतये सर्वयोगप्रदाय च ।
SP0210282 ध्यानिने ध्यायमानाय ध्यानिभिः संस्तुताय च ॥
SP0210291 मृत्यवे कालदण्डाय यमाय च महात्मने ।
SP0210292 देवाधिपतये चैव दिव्यसंहननाय च ॥
SP0210301 यज्ञाय वसुदानाय स्वर्गायाजन्मदाय च ।
SP0210302 सवित्रे सर्वदेवानां धर्मायानेकरूपिणे ॥
SP0210311 अमृताय वरेण्याय सर्वदेवस्तुताय च ।
SP0210312 ब्रह्मणश्च शिरोहर्त्रे यज्ञस्य च महात्मनः ॥
SP0210321 त्रिपुरघ्नाय चोग्राय सर्वाशुभहराय च ।
SP0210322 उमादेहार्धरूपाय ललाटनयनाय च ॥
SP0210331 महिषान्धकभेत्ताय स्रष्ट्रे वै परमेष्ठिने ।
SP0210332 ब्रह्मणो गुरवे चैव ब्रह्मणो जनकाय च ॥
SP0210341 कुमारगुरवे चैव कुमारवरदाय च ।
SP0210342 हलिने मुषलघ्नाय महाहासाय वै नमः ॥
SP0210351 मृत्युपाशोग्रहस्ताय तक्षकब्रह्मसूत्रिणे ।
SP0210352 सविद्युद्घनवाहाय तथैव वृषयायिने ॥
SP0210361 हिमवद्विन्ध्यवासाय मेरुपर्वतवासिने ।
SP0210362 कैलासवासिने चैव धनेश्वरसखाय च ॥
SP0210371 विष्णोर्देहार्धदत्ताय तस्यैव वरदाय च ।
SP0210372 सर्वभूतासमज्ञाय सर्वभूतानुकम्पिने ॥
SP0210381 अन्तर्भूताधिभूताय प्राणिनां जीवदाय च ।
SP0210382 मनसे मन्यमानाय अतिमानाय चैव हि ॥
SP0210391 बुध्यमानाय बुद्धाय द्रष्ट्रे वै चक्षुषे नमः ।
SP0210392 नमस्ते स्पर्शयित्रे च तथैव स्पर्शनाय च ॥
SP0210401 नमस्ते रसयित्रे च तथैव रसनाय च ।
SP0210402 नमो घ्राणाय घ्रात्रे च श्रोत्रे श्रोत्राय चैव हि ।
SP0210403 हस्तिने चैव हस्ताय तथा पादाय पादिने ॥
SP0210411 नमोऽस्त्वानन्दकर्त्रे च आनन्दाय च वै नमः ।
SP0210412 वाचेऽथ वाग्मिने चैव तन्मात्राय महात्मने ॥
SP0210421 सूक्ष्माय चैव स्थूलाय सत्त्वाय रजसे नमः ।
SP0210422 नमश्च तमसे नित्यं क्षेत्रज्ञायाजिताय च ॥
SP0210431 विष्णवे लोकतन्त्राय प्रजानां पतये नमः ।
SP0210432 मनवे सप्तऋषये तप्यमानाय तापिने ॥
SP0210441 ब्रह्मण्यायाथ शुद्धाय तथा दुर्वाससे नमः ।
SP0210442 शिल्पिने शिल्पनाथाय विदुषे विश्वकर्मणे ॥

SP0210451 अत्रये भृगवे चैव तथैवाश्गिरसे नमः ।
SP0210452 पुलहाय पुलस्त्याय क्रतुदक्षानलाय च ॥
SP0210461 धर्माय रुचये चैव वसिष्ठाय नमोऽस्तु ते ।
SP0210462 भूताय भूतनाथाय कुष्माण्डपतये नमः ॥
SP0210471 तिष्ठते द्रवते चैव गायते नृत्यतेऽपि च ।
SP0210472 अवश्यायाप्यवध्याय अजरायामराय च ॥
SP0210481 अक्षयायाव्ययायैव तथाप्रतिहताय च ।
SP0210482 अनावेश्याय सर्वेषां दृश्यायादृश्यरूपिणे ॥
SP0210491 सूक्ष्मेभ्यश्चापि सूक्ष्माय सर्वगाय महात्मने ।
SP0210492 नमस्ते भगवंस्त्र्यक्ष नमस्ते भगवञ्छिव ।
SP0210493 नमस्ते सर्वलोकेश नमस्ते लोकभावन ॥
SP0210501 न मे देवाधिपत्येन ब्रह्मत्वेनाथवा पुनः ।
SP0210502 न विष्णुत्वेन देवेश नापीन्द्रत्वेन भूतप ।
SP0210503 इच्छाम्यहं तवेशान गणत्वं नित्यमव्ययम् ॥
SP0210511 नित्यं त्वां सगणं साम्बं प्रसन्नं सपरिच्छदम् ।
SP0210512 द्रष्टुमिच्छामि देवेश एष मे दीयतां वरः ॥
SP0210521 त्वं नो गतिः पुरा देव त्वं चैवार्तायनं प्रभुः ।
SP0210522 शरणं च त्वमेवाथ नान्यं पश्यामि कर्हिचित् ॥
SP0210531 त्वया त्यक्तस्य चैवाशु विनाशो नात्र संशयः ।
SP0210532 अन्यां गतिं न पश्यामि यस्या आत्यन्तिकं शुभम् ॥
SP0210541 अनुरक्तं च भक्तं च त्वत्परं त्वदपाश्रयम् ।
SP0210542 प्रतीच्छ मां सदा देव एष मे दीयतां वरः ॥
SP0210550 सनत्कुमार उवाच ।
SP0210551 य इमं प्रातरुत्थाय पठेदविमना नरः ।
SP0210552 स देहभेदमासाद्य नन्दीश्वरसमो भवेत् ॥
SP0210561 यश्चेमं शृणुयान्नित्यं श्रावयेद्वा द्विजातिषु ।
SP0210562 सोऽश्वमेधफलं प्राप्य रुद्रलोके महीयते ॥
SP0210571 श्रुत्वा सकृदपि ह्येतं स्तवं पापप्रणाशनम् ।
SP0210572 यत्र तत्र मृतो व्यास न दुर्गतिमवाप्नुयात् ॥
SP0210581 योऽधीत्य नित्यं स्तवमेतमग्र्यं देवं सदाभ्यर्चयते यतात्मा ।
SP0210582 किं तस्य यज्ञैर्विविधैश्च दानैस्तीर्थैः सुतप्तैश्च तथा तपोभिः ॥
SP0219999 इति स्कन्दपुराण एकविंशतिमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय २२

SP0220010 सनत्कुमार उवाच ।
SP0220011 ततस्तु देवदेवेशो भक्त्या परमया युतम् ।

SP0220012 अश्रुपूर्णेक्षणं दीनं पादयोः शिरसा नतम् ॥
SP0220021 कराभ्यां सुसुखाभ्यां तु संगृह्य परमार्तिहा ।
SP0220022 उत्थाप्य नयने सोमः अश्रुपूर्णे ममार्ज ह ॥
SP0220031 उवाच चैनं तुष्टात्मा वचसाप्याययन्निव ।
SP0220032 निरीक्ष्य गणपान्सर्वान्देव्या सह तदा प्रभुः ॥
SP0220040 देव उवाच ।
SP0220041 जाने भक्तिं तव मयि जाने चार्तिं तवानघ ।
SP0220042 तस्य सर्वस्य शैलादे उदर्कं संनिशामय ॥
SP0220051 अमरो जरया त्यक्तो नित्यं दुःखविवर्जितः ।
SP0220052 अक्षयश्चाव्ययश्चैव सपिता ससुहृज्जनः ॥
SP0220061 ममेष्टो गणपश्चैव मद्वीर्यो मत्पराक्रमः ।
SP0220062 इष्टो मम सदा चैव मम पार्श्वगतः सदा ।
SP0220063 मद्रूपश्चैव भविता महायोगबलान्वितः ॥
SP0220071 ऋद्धिमच्चैव ते द्वीपं क्षीरोदममृताकरम् ।
SP0220072 संवासं सम्प्रयच्छामि तत्र रंस्यसि सर्वदा ॥
SP0220081 कुशेशयमयीं मालामवमुच्यात्मनस्ततः ।
SP0220082 आबबन्ध महातेजा नन्दिने दिव्यरूपिणीम् ॥
SP0220091 स तया मालया नन्दी बभौ कण्ठावसक्तया ।
SP0220092 त्र्यक्षो दशभुजः श्रीमान्द्वितीय इव शंकरः ॥
SP0220101 ततस्तं वै समादाय हस्तेन भगवान्हरः ।
SP0220102 उवाच ब्रूहि किं तेऽद्य ददानि वरमुत्तमम् ॥
SP0220111 आश्रमश्चायमत्यर्थं तपसा तव भावितः ।
SP0220112 जप्येश्वर इति ख्यातो मम गुह्यो भविष्यति ॥
SP0220121 समन्ताद्योजनं क्षेत्रं दिव्यं देवगणैर्वृतम् ।
SP0220122 सिद्धचारणसंकीर्णमप्सरोगणसेवितम् ।
SP0220123 सिद्धिक्षेत्रं परं गुह्यं भविष्यति न संशयः ॥
SP0220131 कर्मणा मनसा वाचा यत्किंचित्कुरुते नरः ।
SP0220132 शुभं वाप्यशुभं वात्र सर्वं भवितृ तच्छुभम् ॥
SP0220141 जाप्यं मानसं तुल्यं वै रुद्राणां तद्भविष्यति ।
SP0220142 यत्र तत्र मृता मर्त्या यास्यन्ति तव लोकताम् ॥
SP0220151 ततो जटास्रुतं वारि गृहीत्वा हारनिर्मलम् ।
SP0220152 उक्त्वा नदी भवस्वेति विससर्ज महातपाः ॥
SP0220161 सा ततो दिव्यतोया च पुण्या मणिजला शुभा ।
SP0220162 हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ।
SP0220163 पद्मोत्पलवनोपेता प्रावर्तत महानदी ॥
SP0220171 स्त्रीरूपधारिणी चैव प्राञ्जलिः शिरसा नता ।

SP0220172 पद्मोत्पलदलाभाक्षी महादेवमुपस्थिता ॥
SP0220181 तामुवाच ततो देवो नदीं स्वयमुपस्थिताम् ।
SP0220182 यस्माज्जटोदकाद्देवि प्रवृत्ता त्वं शुभानने ।
SP0220183 तस्माज्जटोदा नाम्ना त्वं भविष्यसि सरिद्वरा ॥
SP0220191 त्वयि स्नानं तु यः कुर्याच्छुचिः प्रयतमानसः ।
SP0220192 सोऽश्वमेधफलं प्राप्य रुद्रलोके महीयते ॥
SP0220200 सनत्कुमार उवाच ।
SP0220201 ततो देव्या महादेवो नन्दीश्वरमतिप्रभम् ।
SP0220202 पुत्रस्तेऽयमिति प्रोच्य पादयोस्तं व्यनामयत् ॥
SP0220211 सा तमाघ्राय शिरसि पाणिभ्यां परिमार्जती ।
SP0220212 पुत्रप्रेम्णाभ्यषिञ्चत्तं स्रोतोभिः स्तनजैस्त्रिभिः ।
SP0220213 पयसा शङ्खगौरेण देवी देवं निरीक्षती ॥
SP0220221 तानि स्रोतांसि त्रीण्यस्याः स्रुतान्योघवती नदी ।
SP0220222 नदीं त्रिस्रोतसीं पुण्यां ततस्तामवदद्धरः ॥
SP0220231 त्रिस्रोतसं नदीं दृष्ट्वा वृषः परमहर्षितः ।
SP0220232 ननर्द नादात्तस्माच्च सरिदन्या ततोऽभवत् ॥
SP0220241 यस्माद्वृषभनादेन प्रवृत्ता सा महानदी ।
SP0220242 तस्माड्ढिढत्किरिकां तां वै उवाच वृषभध्वजः ॥
SP0220251 जाम्बूनदमयं चित्रं स्वं देवः परमाद्भुतम् ।
SP0220252 मुकुटं चाबबन्धास्मै कुण्डले चामृतोद्भवे ॥
SP0220261 तं तथाभ्यर्चितं व्योम्नि दृष्ट्वा मेघः प्रभाकरः ।
SP0220262 देवोपवाह्यः सिषिचे सनादः सतडिद्गुणः ॥
SP0220271 तस्याभिषिक्तस्य तदा प्रवृत्ते स्रोतसी भृशम् ।
SP0220272 यस्मात्सुवर्णान्निःसृत्य नद्येका सम्प्रवर्तत ।
SP0220273 स्वर्णोदकेति नाम्ना तां महादेवोऽभ्यभाषत ॥
SP0220281 जाम्बूनदमयाद्यस्माद्द्वितीया मुकुटाच्छुभात् ।
SP0220282 प्रावर्तत नदी पुण्या ऊचुर्जम्बूनदीति ताम् ॥
SP0220291 एतत्पञ्चनदं नाम जप्येश्वरसमीपगम् ।
SP0220292 व्याख्यातं फलमेतासां जटोदायां महात्मना ॥
SP0220301 तच्च पञ्चनदं दिव्यं देवं जप्येश्वरं च तम् ।
SP0220302 त्रिरात्रोपोषितो गत्वा स्नात्वाभ्यर्च्य च शूलिनम् ॥
SP0220311 नन्दीश्वरस्यानुचरः क्षीरोदनिलयो भवेत् ॥
SP0220321 यस्तु जप्येश्वरे प्राणान्परित्यजति दुस्त्यजान् ।
SP0220322 नियमेनान्यथा वापि स मे गणपतिर्भवेत् ॥
SP0220331 नन्दीश्वरसमो नित्यः शाश्वतः अक्षयोऽव्ययः ।
SP0220332 मम पार्श्वादनपगः प्रियः संमत एव च ॥

SP0220341 जप्येश्वरं पञ्चनदं च तद्वै यो मानवोऽभ्येत्य जहाति देहम् ।
SP0220342 स मे सदा स्याद्गणपो वरिष्ठस्त्वया समः कान्तिवपुश्च नित्यम् ॥
SP0229999 इति स्कन्दपुराणे द्वाविंशतिमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय २३

SP0240010 सनत्कुमार उवाच ।
SP0240011 ते गणेशा महासत्त्वाः सर्वे देवेश्वरेश्वराः ।
SP0240012 प्रणम्य देवं देवीं च इदं वचनमब्रुवन् ॥
SP0240021 भगवन्देवतारिघ्न देवदेवाम्बिकापते ।
SP0240022 किमर्थं वयमाहूता आज्ञापय कृतं हि तत् ॥
SP0240031 किं सागराञ्छोषयामो यमं वा सह किंकरैः ।
SP0240032 हन्मो मृत्युमुतामृत्युर्न भवत्वद्य पद्मजः ॥
SP0240041 बद्धवेन्द्रं सह देवैश्च सविष्णुं सह वायुना ।
SP0240042 आनयामः सुसंक्रुद्धा दैत्यान्वा सह दानवैः ॥
SP0240051 कस्याद्य व्यसनं घोरं करिष्यामस्तवाज्ञया ।
SP0240052 कस्य वाद्योत्सवं देव सर्वकामसमृद्धिमत् ॥
SP0240061 तांस्तथावादिनः सर्वान्नमतो भक्तवत्सलः ।
SP0240062 उवाच देवः सम्पूज्य गणान्गणपतिर्भवः ॥
SP0240070 देव उवाच ।
SP0240071 शृणुध्वं यत्कृते यूयमिहाहूता जगद्धिताः ।
SP0240072 श्रुत्वा च प्रयतात्मानः कुरुध्वं तदशङ्किताः ॥
SP0240081 नन्दीश्वरोऽयं पुत्रो नः सर्वेषामीश्वरेश्वरः ।
SP0240082 प्रियोऽग्रनायकश्चैव सेनानीर्वः समाहितः ॥
SP0240091 तमिमं मम संदेशाद्यूयं सर्वेऽभिसंमताः ।
SP0240092 सेनान्यमभिषिञ्चध्वं महायोगपतिं पतिम् ॥
SP0240101 अद्यप्रभृति युष्माकमयं नन्दीश्वरः शुभः ।
SP0240102 प्रियो गौरवयुक्तश्च सेनानीरमरः प्रभुः ॥
SP0240110 सनत्कुमार उवाच ।
SP0240111 एवमुक्ते भगवता गणपाः सर्व एव ते ।
SP0240112 एवमस्त्विति संमन्त्र्य सम्भारानाहरंस्ततः ॥
SP0240121 तस्य रूपाश्रयं दिव्यं जाम्बूनदमयं शुभम् ।
SP0240122 आसनं मेरुसंकाशं मनोरममथाहरन् ॥
SP0240131 शातकुम्भमयं चापि चारुचामीकरप्रभम् ।
SP0240132 मुक्तादामावलम्बं च मणिरत्नावभासितम् ॥
SP0240141 स्तम्भैश्च वैडूर्यमयैः किङ्किणीजालसंवृतम् ।
SP0240142 चारुरत्नकसंयुक्तं मण्डपं विश्वतोमुखम् ।

SP0240143 कृत्वा चक्रुश्च तन्मध्ये तदासनवरं शुभम् ॥
SP0240151 तस्याग्रतः पादपीठं नीलं वज्रावभासितम् ।
SP0240152 चक्रुः पादप्रतिष्ठार्थं कलशौ चास्य पार्श्वगौ ।
SP0240153 सम्पूर्णौ परमाम्भोभिररविन्दावृताननौ ॥
SP0240161 अग्रतोऽग्निं समाधाय वृषभं चापि पार्श्वतः ।
SP0240162 सवत्सां सुरभिं चापि तस्य पार्श्वेऽथ दक्षिणे ॥
SP0240171 छत्त्रं शतशलाकं च जाम्बूनदमयं शुभम् ।
SP0240172 शङ्खहाराम्बुगौरेण पृष्ठेनाभिविराजितम् ॥
SP0240181 व्यजनं चन्द्रशुभ्रं च हेमदण्डं सुचारुमत् ।
SP0240182 मालां कुशेशयानां च भ्रमरावलिसेविताम् ॥
SP0240191 आनिन्युस्तत्र गणपा नन्द्यावर्तांश्च काञ्चनान् ।
SP0240192 पुनर्वसुं च पुष्यं च द्वौ मत्स्यौ वरुणालयौ ॥
SP0240201 स्वस्तिकं वर्धमानं च श्रीवत्सं चैव काञ्चनम् ।
SP0240202 कीचका वेणवश्चैव कन्या चैवाभिपूजिता ॥
SP0240211 ऐरावतं सुप्रतीकं गजावेतौ च पूजितौ ।
SP0240212 ध्वजं च पूजितं दिव्यं शङ्खं चैवेन्दुवर्चसम् ॥
SP0240221 कलशानां सहस्रं च काञ्चनानां सुवर्चसाम् ।
SP0240222 राजतानां सहस्रं च पार्थिवानां तथैव च ॥
SP0240231 ताम्राणामथ दिव्यानां सहस्रमनलत्विषाम् ।
SP0240232 वासोयुगं वृक्षजं च विरजः सूक्ष्ममेव च ॥
SP0240241 मुकुटं काञ्चनं चैव सुकृतं विश्वकर्मणा ।
SP0240242 कुण्डले चामले दिव्ये वज्रं चैव वरायुधम् ॥
SP0240251 पट्टिसं च महद्दिव्यं शूलं चाशनिमेव च ।
SP0240252 जाम्बूनदमयं सूत्रं केयूरद्वयमेव च ॥
SP0240261 हारं च मणिचित्राङ्गं रोचनारुचकं तथा ।
SP0240262 नलभां पारियात्रं च वर्षं कङ्कणिमेव च॥
SP0240271 दर्भांश्च दिव्यां समिधमाज्यं धूपमथापि च ।
SP0240272 समन्तान्निन्युरव्यग्रा गणपा देवसंमताः ॥
SP0240281 ततो दिशः समुद्राश्च वरुणः सधनेश्वरः ।
SP0240282 यमोऽग्निर्वसवश्चैव चन्द्रादित्यौ ग्रहैः सह ॥
SP0240291 तारारूपाणि सर्वाणि नक्षत्राणि ध्रुवस्तथा ।
SP0240292 रुद्रा रक्षांसि यक्षाश्च अश्विनौ दैत्यदानवाः ॥
SP0240301 गन्धर्वाप्सरसश्चैव नारदः पर्वतस्तथा ।
SP0240302 पृथिवी च समुद्राश्च वर्षाणि गिरयस्तथा ॥
SP0240311 वृक्षाश्च वीरुधश्चैव ओषध्यश्च महाबलाः ।
SP0240312 नद्यः सर्वाः समाजग्मुः पशवश्चैव सर्वशः ॥

SP0240321 लोकस्य मातरश्चैव पृथिवी स्वर्ग एव च ।
SP0240322 भूतानि प्रकृतिश्चैव इन्द्रियाणि च सर्वशः ॥
SP0240331 तीर्थानि चैव सर्वाणि दानानि विविधानि च ।
SP0240332 ऋचो यजूंषि सामानि अथर्वाङ्गिरसावपि ॥
SP0240341 यज्ञाश्च क्रतवश्चैव इष्टयो नियमास्तथा ।
SP0240342 छन्दांसि चैव सर्वाणि पिशाचा देवयोनयः ।
SP0240343 ब्रह्मा च ऋषयश्चैव विष्णुः सानुचरस्तथा ॥
SP0240351 तेष्वागतेषु सर्वेषु भगवान्गोवृषध्वजः ।
SP0240352 सर्वकार्यविधिं कर्तुमादिदेश पितामहम् ॥
SP0240361 एकैकं कलशं तत्र सर्वौषधिसमन्वितम् ।
SP0240362 कृत्वाद्भिः पूरयित्वा च कुशेशयमुखावृतम् ॥
SP0240371 जयां च विजयां चैव सिंहीं व्याघ्रीं तथैव च ।
SP0240372 सुवर्चलां शशण्खपुष्पीं विष्णुक्रान्तां पुनर्नवाम् ॥
SP0240381 कुमारीं चन्द्रकान्तां च मृतसंजीवनीमपि ।
SP0240382 आदित्यवर्चसं चैव अमृतां श्रीनिकेतनाम् ॥
SP0240391 तथा कुमुद्वतीं चैव प्राक्षिपंस्तेष्वथौषधीः ।
SP0240392 पार्थिवेषु तदा व्यास सर्वेष्वेव गणेश्वराः ॥
SP0240401 सौवर्णेषु तु सर्वेषु तीर्थानि विविधानि च ।
SP0240402 दानानि चैव सर्वाणि भगवान्संन्यवेशयत् ॥
SP0240411 राजतेषु च कुम्भेषु मन्त्रांश्छन्दांसि चैव ह ।
SP0240412 क्रतूनन्यांश्च विविधा इष्टीः काम्यांस्तथेतरान् ॥
SP0240421 औदुम्बरेषु सर्वेषु सरितः सागरांस्तथा ।
SP0240422 तपांसि नियमांश्चैव भगवानभ्यविन्यसत् ॥
SP0240431 एकैकं कलशं तत्र अभिपूर्याभिमन्त्र्य च ।
SP0240432 वेष्टयित्वा च सूत्रेण देवेभ्यः प्रददौ विभुः ॥
SP0240441 स जग्राह तदा ब्रह्मा एकं कलशमात्मना ।
SP0240442 विष्णवे च ददावेकमेकमिन्द्राय धीमते ।
SP0240443 गणपेभ्यस्तथा चान्यानृषिभ्यश्च पितामहः ॥
SP0240451 ततस्तमासने तस्मिन्नुपवेश्य महामनाः ।
SP0240452 अर्चयित्वा ततो ब्रह्मा स्वयमेवाभ्यषिञ्चत ॥
SP0240461 ततो विष्णुस्ततः शक्रो ऋषयश्च सहामरैः ।
SP0240462 गणाधिपाश्च सर्वे ते अभ्यषिञ्चन्त नन्दिनम् ॥
SP0240471 वासोयुगं च तद्दिव्यं गन्धान्दिव्यांस्तथैव च ।
SP0240472 केयूरे कुण्डले चैव मुकुटं हारमेव च ।
SP0240473 पट्टिसं शूलवज्रे च अशनीं च ददौ स्वयम् ॥
SP0240481 छत्रं जग्राह देवेन्द्रो वायुर्व्यजनमेव च ।

SP0240482 ऋषयस्तुष्टुवुश्चैव पितामहपुरोगमाः ॥
SP0240490 विष्णुरुवाच ।
SP0240491 नमः कुष्माण्डराजाय वज्रोद्यतकराय च ।
SP0240492 शालश्ण्कायनपौत्राय हलमार्गोत्थिताय च ॥
SP0240501 शिलादस्य च पुत्राय रुद्रजप्यकराय च ।
SP0240502 रुद्रभक्ताय देवाय नमोऽन्तर्जलशायिने ॥
SP0240511 गणानां पतये चैव भूतानां पतये नमः ।
SP0240512 उमापुत्राय देवाय पट्टिसायुधधारिणे ॥
SP0240521 नमो दंष्ट्राकरालाय ललाटनयनाय च ।
SP0240522 प्रमथाय वरेण्याय ईशानायार्पिताय च ॥
SP0240531 द्वाराध्यक्षाय शूराय सुयशापतये नमः ।
SP0240532 नमः प्रवरमालाय क्षीरोदनिलयाय च ॥
SP0240541 महागणाधिपतये महायोगेश्वराय च ।
SP0240542 दिण्डिमुण्डाय चण्डाय एकाक्षररताय च ॥
SP0240551 अक्षयायामृतायैव अजरायामराय च ।
SP0240552 पशूनां पतये चैव जेत्रे मृत्योस्तथैव च ॥
SP0240561 नमः पवनवेगाय सर्वज्ञायाजिताय च ।
SP0240562 अनेकशिरसे चैव अनेकचरणाय च ॥
SP0240571 किरीटिने कुण्डलिने महापरिघबाहवे ।
SP0240572 सर्वान्देवान्गणांश्चैव पाहि देव नमोऽस्तु ते ॥
SP0240580 सनत्कुमार उवाच ।
SP0240581 एवं स्तुत्वा ततो देवस्तस्मै व्यास महात्मने ।
SP0240582 प्राञ्जलिः प्रयतो भूत्वा जयशब्दं चकार ह ॥
SP0240591 ततो गणा जयेत्यूचुस्ततो देवास्ततोऽसुराः ।
SP0240592 ततः सर्वाणि भूतानि ब्रह्मा शक्रस्तथैव च ॥
SP0240601 ततः शश्णखांश्च भेरींश्च पटहाडम्बरांस्तथा ।
SP0240602 वंशांश्च पणवांश्चैव कृकवान्गोविषाणिकान् ॥
SP0240611 दिण्डिमान्वेणुकांश्चैव मर्दलांश्चैव सर्वशः ।
SP0240612 अवादयन्त गणपा हर्षयन्तो मुदा युताः ॥
SP0240620 सनत्कुमार उवाच ।
SP0240621 नन्दीश्वरस्य य इमं स्तवं देवाभिनिर्मितम् ।
SP0240622 पठेत सततं मर्त्यः स गच्छेन्मम लोकताम् ॥
SP0240631 नमो नन्दीश्वरायेति कृत्वा यः स्वप्नमाचरेत् ।
SP0240632 तस्य कुष्माण्डराजेभ्यो न भयं विद्यते क्वचित् ॥
SP0240641 यत्रायं स्थाप्यते नित्यं स्तवः परमपूजितः ।
SP0240642 न भयं तत्र भवति ग्रहेभ्यो व्यास सर्वदा ॥

SP0240651 नन्दीश्वरं ये प्रणमन्ति मर्त्या नित्यं प्रसन्नेन्द्रियशुद्धसत्त्वाः ।
SP0240652 ते देवदेवस्य सहाद्रिपुत्र्या इष्टा वरिष्ठाश्च गणा भवन्ति ॥
SP0249999 इति स्कन्दपुराणे चतुर्विंशतिमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय २४

SP0240010 सनत्कुमार उवाच ।
SP0240011 ते गणेशा महासत्त्वाः सर्वे देवेश्वरेश्वराः ।
SP0240012 प्रणम्य देवं देवीं च इदं वचनमब्रुवन् ॥
SP0240021 भगवन्देवतारिघ्न देवदेवाम्बिकापते ।
SP0240022 किमर्थं वयमाहूता आज्ञापय कृतं हि तत् ॥
SP0240031 किं सागराञ्छोषयामो यमं वा सह किंकरैः ।
SP0240032 हन्मो मृत्युमुतामृत्युर्न भवत्वद्य पद्मजः ॥
SP0240041 बद्धवेन्द्रं सह देवैश्च सविष्णुं सह वायुना ।
SP0240042 आनयामः सुसंक्रुद्धा दैत्यान्वा सह दानवैः ॥
SP0240051 कस्याद्य व्यसनं घोरं करिष्यामस्तवाज्ञया ।
SP0240052 कस्य वाद्योत्सवं देव सर्वकामसमृद्धिमत् ॥
SP0240061 तांस्तथावादिनः सर्वान्नमतो भक्तवत्सलः ।
SP0240062 उवाच देवः सम्पूज्य गणान्गणपतिर्भवः ॥
SP0240070 देव उवाच ।
SP0240071 शृणुध्वं यत्कृते यूयमिहाहूता जगद्धिताः ।
SP0240072 श्रुत्वा च प्रयतात्मानः कुरुध्वं तदशङ्कताः ॥
SP0240081 नन्दीश्वरोऽयं पुत्रो नः सर्वेषामीश्वरेश्वरः ।
SP0240082 प्रियोऽग्रनायकश्चैव सेनानीर्वः समाहितः ॥
SP0240091 तमिमं मम संदेशाद्यूयं सर्वेऽभिसंमताः ।
SP0240092 सेनान्यमभिषिञ्चध्वं महायोगपतिं पतिम् ॥
SP0240101 अद्यप्रभृति युष्माकमयं नन्दीश्वरः शुभः ।
SP0240102 प्रियो गौरवयुक्तश्च सेनानीरमरः प्रभुः ॥
SP0240110 सनत्कुमार उवाच ।
SP0240111 एवमुक्ते भगवता गणपाः सर्व एव ते ।
SP0240112 एवमस्त्विति संमन्त्र्य सम्भारानाहरंस्ततः ॥
SP0240121 तस्य रूपाश्रयं दिव्यं जाम्बूनदमयं शुभम् ।
SP0240122 आसनं मेरुसंकाशं मनोरममथाहरन् ॥
SP0240131 शातकुम्भमयं चापि चारुचामीकरप्रभम् ।
SP0240132 मुक्तादामावलम्बं च मणिरत्नावभासितम् ॥
SP0240141 स्तम्भैश्च वैडूर्यमयैः किङ्किणीजालसंवृतम् ।
SP0240142 चारुरत्नकसंयुक्तं मण्डपं विश्वतोमुखम् ।

SP0240143 कृत्वा चक्रुश्च तन्मध्ये तदासनवरं शुभम् ॥
SP0240151 तस्याग्रतः पादपीठं नीलं वज्रावभासितम् ।
SP0240152 चक्रुः पादप्रतिष्ठार्थं कलशौ चास्य पार्श्वगौ ।
SP0240153 सम्पूर्णौ परमाम्भोभिररविन्दावृताननौ ॥
SP0240161 अग्रतोऽग्निं समाधाय वृषभं चापि पार्श्वतः ।
SP0240162 सवत्सां सुरभिं चापि तस्य पार्श्वेऽथ दक्षिणे ॥
SP0240171 छत्त्रं शतशलाकं च जाम्बूनदमयं शुभम् ।
SP0240172 शशङ्खहाराम्बुगौरेण पृष्ठेनाभिविराजितम् ॥
SP0240181 व्यजनं चन्द्रशुभ्रं च हेमदण्डं सुचारुमत् ।
SP0240182 मालां कुशेशयानां च भ्रमरावलिसेविताम् ॥
SP0240191 आनिन्युस्तत्र गणपा नन्द्यावर्तांश्च काञ्चनान् ।
SP0240192 पुनर्वसुं च पुष्यं च द्वौ मत्स्यौ वरुणालयौ ॥
SP0240201 स्वस्तिकं वर्धमानं च श्रीवत्सं चैव काञ्चनम् ।
SP0240202 कीचका वेणवश्चैव कन्या चैवाभिपूजिता ॥
SP0240211 ऐरावतं सुप्रतीकं गजावेतौ च पूजितौ ।
SP0240212 ध्वजं च पूजितं दिव्यं शङ्खं चैवेन्दुवर्चसम् ॥
SP0240221 कलशानां सहस्रं च काञ्चनानां सुवर्चसाम् ।
SP0240222 राजतानां सहस्रं च पार्थिवानां तथैव च ॥
SP0240231 ताम्राणामथ दिव्यानां सहस्रमनलत्विषाम् ।
SP0240232 वासोयुगं वृक्षजं च विरजः सूक्ष्ममेव च ॥
SP0240241 मुकुटं काञ्चनं चैव सुकृतं विश्वकर्मणा ।
SP0240242 कुण्डले चामले दिव्ये वज्रं चैव वरायुधम् ॥
SP0240251 पट्टिसं च महद्दिव्यं शूलं चाशनिमेव च ।
SP0240252 जाम्बूनदमयं सूत्रं केयूरद्वयमेव च ॥
SP0240261 हारं च मणिचित्राङ्गं रोचनारुचकं तथा ।
SP0240262 नलभां पारियात्रं च वर्षं कङ्कणिमेव च॥
SP0240271 दर्भांश्च दिव्यां समिधमाज्यं धूपमथापि च ।
SP0240272 समन्तान्निन्युरव्यग्रा गणपा देवसंमताः ॥
SP0240281 ततो दिशः समुद्राश्च वरुणः सधनेश्वरः ।
SP0240282 यमोऽग्निर्वसवश्चैव चन्द्रादित्यौ ग्रहैः सह ॥
SP0240291 तारारूपाणि सर्वाणि नक्षत्राणि ध्रुवस्तथा ।
SP0240292 रुद्रा रक्षांसि यक्षाश्च अश्विनौ दैत्यदानवाः ॥
SP0240301 गन्धर्वाप्सरसश्चैव नारदः पर्वतस्तथा ।
SP0240302 पृथिवी च समुद्राश्च वर्षाणि गिरयस्तथा ॥
SP0240311 वृक्षाश्च वीरुधश्चैव ओषध्यश्च महाबलाः ।
SP0240312 नद्यः सर्वाः समाजग्मुः पशवश्चैव सर्वशः ॥

SP0240321 लोकस्य मातरश्चैव पृथिवी स्वर्ग एव च ।
SP0240322 भूतानि प्रकृतिश्चैव इन्द्रियाणि च सर्वशः ॥
SP0240331 तीर्थानि चैव सर्वाणि दानानि विविधानि च ।
SP0240332 ऋचो यजूंषि सामानि अथर्वाङ्गिरसावपि ॥
SP0240341 यज्ञाश्च क्रतवश्चैव इष्टयो नियमास्तथा ।
SP0240342 छन्दांसि चैव सर्वाणि पिशाचा देवयोनयः ।
SP0240343 ब्रह्मा च ऋषयश्चैव विष्णुः सानुचरस्तथा ॥
SP0240351 तेष्वागतेषु सर्वेषु भगवान्गोवृषध्वजः ।
SP0240352 सर्वकार्यविधिं कर्तुमादिदेश पितामहम् ॥
SP0240361 एकैकं कलशं तत्र सर्वौषधिसमन्वितम् ।
SP0240362 कृत्वाद्भिः पूरयित्वा च कुशेशयमुखावृतम् ॥
SP0240371 जयां च विजयां चैव सिंहीं व्याघ्रीं तथैव च ।
SP0240372 सुवर्चलां शङ्खपुष्पीं विष्णुक्रान्तां पुनर्नवाम् ॥
SP0240381 कुमारीं चन्द्रकान्तां च मृतसंजीवनीमपि ।
SP0240382 आदित्यवर्चसं चैव अमृतां श्रीनिकेतनाम् ॥
SP0240391 तथा कुमुद्वतीं चैव प्राक्षिपंस्तेष्वथौषधीः ।
SP0240392 पार्थिवेषु तदा व्यास सर्वेष्वेव गणेश्वराः ॥
SP0240401 सौवर्णेषु तु सर्वेषु तीर्थानि विविधानि च ।
SP0240402 दानानि चैव सर्वाणि भगवान्संन्यवेशयत् ॥
SP0240411 राजतेषु च कुम्भेषु मन्त्रांश्छन्दांसि चैव ह ।
SP0240412 क्रतूनन्यांश्च विविधा इष्टीः काम्यांस्तथेतरान् ॥
SP0240421 औदुम्बरेषु सर्वेषु सरितः सागरांस्तथा ।
SP0240422 तपांसि नियमांश्चैव भगवानभ्यविन्यसत् ॥
SP0240431 एकैकं कलशं तत्र अभिपूर्याभिमन्त्र्य च ।
SP0240432 वेष्टयित्वा च सूत्रेण देवेभ्यः प्रददौ विभुः ॥
SP0240441 स जग्राह तदा ब्रह्मा एकं कलशमात्मना ।
SP0240442 विष्णवे च ददावेकमेकमिन्द्राय धीमते ।
SP0240443 गणपेभ्यस्तथा चान्यानृषिभ्यश्च पितामहः ॥
SP0240451 ततस्तमासने तस्मिन्नुपवेश्य महामनाः ।
SP0240452 अर्चयित्वा ततो ब्रह्मा स्वयमेवाभ्यषिञ्चत ॥
SP0240461 ततो विष्णुस्ततः शक्रो ऋषयश्च सहामरैः ।
SP0240462 गणाधिपाश्च सर्वे ते अभ्यषिञ्चन्त नन्दिनम् ॥
SP0240471 वासोयुगं च तद्दिव्यं गन्धान्दिव्यांस्तथैव च ।
SP0240472 केयूरे कुण्डले चैव मुकुटं हारमेव च ।
SP0240473 पट्टिसं शूलवज्रे च अशनीं च ददौ स्वयम् ॥
SP0240481 छत्रं जग्राह देवेन्द्रो वायुर्व्यजनमेव च ।

SP0240482 ऋषयस्तुष्टुवुश्चैव पितामहपुरोगमाः ॥
SP0240490 विष्णुरुवाच ।
SP0240491 नमः कुष्माण्डराजाय वज्रोद्यतकराय च ।
SP0240492 शालश्ण्कायनपौत्राय हलमार्गोत्थिताय च ॥
SP0240501 शिलादस्य च पुत्राय रुद्रजप्यकराय च ।
SP0240502 रुद्रभक्ताय देवाय नमोऽन्तर्जलशायिने ॥
SP0240511 गणानां पतये चैव भूतानां पतये नमः ।
SP0240512 उमापुत्राय देवाय पट्टिसायुधधारिणे ॥
SP0240521 नमो दंष्ट्राकरालाय ललाटनयनाय च ।
SP0240522 प्रमथाय वरेण्याय ईशानायार्पिताय च ॥
SP0240531 द्वाराध्यक्षाय शूराय सुयशापतये नमः ।
SP0240532 नमः प्रवरमालाय क्षीरोदनिलयाय च ॥
SP0240541 महागणाधिपतये महायोगेश्वराय च ।
SP0240542 दिण्डिमुण्डाय चण्डाय एकाक्षररताय च ॥
SP0240551 अक्षयायामृतायैव अजरायामराय च ।
SP0240552 पशूनां पतये चैव जेत्रे मृत्योस्तथैव च ॥
SP0240561 नमः पवनवेगाय सर्वज्ञायाजिताय च ।
SP0240562 अनेकशिरसे चैव अनेकचरणाय च ॥
SP0240571 किरीटिने कुण्डलिने महापरिघबाहवे ।
SP0240572 सर्वान्देवान्गणांश्चैव पाहि देव नमोऽस्तु ते ॥
SP0240580 सनत्कुमार उवाच ।
SP0240581 एवं स्तुत्वा ततो देवस्तस्मै व्यास महात्मने ।
SP0240582 प्राञ्जलिः प्रयतो भूत्वा जयशब्दं चकार ह ॥
SP0240591 ततो गणा जयेत्यूचुस्ततो देवास्ततोऽसुराः ।
SP0240592 ततः सर्वाणि भूतानि ब्रह्मा शक्रस्तथैव च ॥
SP0240601 ततः शश्णखांश्च भेरींश्च पटहाडम्बरांस्तथा ।
SP0240602 वंशांश्च पणवांश्चैव कृकवान्गोविषाणिकान् ॥
SP0240611 दिण्डिमान्वेणुकांश्चैव मर्दलांश्चैव सर्वशः ।
SP0240612 अवादयन्त गणपा हर्षयन्तो मुदा युताः ॥
SP0240620 सनत्कुमार उवाच ।
SP0240621 नन्दीश्वरस्य य इमं स्तवं देवाभिनिर्मितम् ।
SP0240622 पठेत सततं मर्त्यः स गच्छेन्मम लोकताम् ॥
SP0240631 नमो नन्दीश्वरायेति कृत्वा यः स्वप्नमाचरेत् ।
SP0240632 तस्य कुष्माण्डराजेभ्यो न भयं विद्यते क्वचित् ॥
SP0240641 यत्रायं स्थाप्यते नित्यं स्तवः परमपूजितः ।
SP0240642 न भयं तत्र भवति ग्रहेभ्यो व्यास सर्वदा ॥

SP0240651 नन्दीश्वरं ये प्रणमन्ति मर्त्या नित्यं प्रसन्नेन्द्रियशुद्धसत्त्वाः ।
SP0240652 ते देवदेवस्य सहाद्रिपुत्र्या इष्टा वरिष्ठाश्च गणा भवन्ति ॥
SP0249999 इति स्कन्दपुराणे चतुर्विंशतिमोऽध्यायः ॥

---

## स्कंदपुराण अध्याय २५

SP0250010 सनत्कुमार उवाच ।
SP0250011 ततस्तत्रागतान्देवान्देवताधिपतिर्भवः ।
SP0250012 मरुतः प्राह सम्पूज्य कन्यार्थं सदसत्पतिः ॥
SP0250021 मरुतो ये महावेगा महासत्त्वा महौजसः ।
SP0250022 आमन्त्र्य नाम्ना तानीशः सशक्रः सपितामहः ॥
SP0250031 युष्माकं सुयशा कन्या सुभगा दिव्यरूपिणी ।
SP0250032 दातुमर्हथ तां सुभ्रूं स्नुषां मह्यं महाबलाः ॥
SP0250040 मरुत ऊचुः ।
SP0250041 त्वमस्माकं च तस्याश्च सर्वस्य जगतस्तथा ।
SP0250042 प्रभविष्णुस्त्रिलोकेश न तु याचितुमर्हसि ॥
SP0250051 त्वयैव देया ग्राह्या च त्वं नो गतिरनुत्तमा ।
SP0250052 मा नः परानिवेशान याचनेन विभावय ॥
SP0250061 पिता नः कश्यपः श्रीमान्मरीचिश्च पितामहः ।
SP0250062 पितामहपिता ब्रह्मा तस्यापि त्वं पितामहः ।
SP0250063 स त्वं पितामहोऽस्माकं न परान्कर्तुमर्हसि ॥
SP0250071 स एवमुक्तो देवेशो मरुद्भिर्देवसत्तमैः ।
SP0250072 सुयशां मरुतां कन्यामानयामास तत्क्षणात् ॥
SP0250081 स्वयं होतास्य तत्रासीद्ब्रह्मा लोकपितामहः ।
SP0250082 कश्यपश्च तथोद्गाता अत्रिः साम स्वयं जगौ ।
SP0250083 अथर्वाङ्गिरसौ देवौ ब्रह्मत्वमपि चक्रतुः ॥
SP0250091 नारदः पर्वतश्चैव चित्रसेनश्च गायनः ।
SP0250092 विश्वावसू रुचिश्चैव हाहा हूहू तथैव च ॥
SP0250101 तथा शालिशिरा यश्च विश्रुतो गण्डमण्डकः ।
SP0250102 ईतिश्चैवेन्द्रवाहश्च यज्ञवाहोऽथ दक्षिणः ।
SP0250103 एते चान्ये च गन्धर्वा जगुर्मधुरकण्ठिनः ॥
SP0250111 उर्वशी चैव रम्भा च घृताची पूर्वचित्त्यपि ।
SP0250112 तिलोत्तमा च विश्वाची अन्याश्चाप्सरसः शुभाः ।
SP0250113 अनृत्यन्त महाभागा नृत्तं सुरमनोहरम् ॥
SP0250120 सनत्कुमार उवाच ।
SP0250121 स एवमभवद्व्यास विवाहस्तस्य धीमतः ।
SP0250122 नन्दिनो गणमुख्यस्य अनौपम्यो ह्यनिन्दितः ॥

SP0250131 ततः स तु कृतोद्वाहो नन्दी गत्वा महामनाः ।
SP0250132 पादान्ववन्दे देवस्य देव्या ब्रह्मण एव च ।
SP0250133 शिलादस्य च लोकेशः श्रिया परमया युतः ॥
SP0250140 देव उवाच ।
SP0250141 वरं वृणीष्व पुत्र त्वं स्नुषा चेयं तव प्रिया ।
SP0250142 वरं ददामि ते वत्स अनया सहमीप्सितम् ॥
SP0250150 नन्द्युवाच ।
SP0250151 भगवन्यदि तुष्टोऽसि त्वयि भक्तिर्दृढास्तु मे ।
SP0250152 सदा च तुष्टो भव मे साम्बः सह गणेश्वरैः ॥
SP0250161 पितरं चैव मे देव उत्पादकमिमं प्रभो ।
SP0250162 अनुग्रहेण युक्तेन योक्तुमर्हसि कामद ॥
SP0250170 देव उवाच ।
SP0250171 सदाहं तव नन्दीश सुतुष्टः सगणेश्वरः ।
SP0250172 पार्वत्या सहितो धीमन्निदं च शृणु मे वचः ॥
SP0250181 सदेष्टश्च वरिष्ठश्च परमैश्वर्यसंयुतः ।
SP0250182 महायोगी महेष्वासो महाबलपराक्रमः ॥
SP0250191 अजय्यश्चैव जेता च पूज्येज्यश्च सदा भव ।
SP0250192 अहं यत्र भवांस्तत्र यत्र त्वं तत्र चाप्यहम् ॥
SP0250201 अयं च ते पिता विप्रः परमैश्वर्यसंयुतः ।
SP0250202 भविष्यति गणाध्यक्षो महागणपतिर्मम ॥
SP0250211 पर्वतं चास्य वैभ्राजं कामगं सर्वकाञ्चनम् ।
SP0250212 उपेतं भवनैर्दिव्यैः प्रयच्छामि जनावृतम् ।
SP0250213 तेनायं सर्वलोकेषु चरिष्यति यथेप्सितम् ॥
SP0250221 स्थानं श्रीपर्वते चास्य भविष्यति सुपूजितम् ।
SP0250222 भृगौ तस्मिंश्च यः प्राणांस्त्यक्ष्यते वै सुधार्मिकः ।
SP0250223 स कामचारी वैभ्राजे गणपोऽस्य भविष्यति ॥
SP0250230 सनत्कुमार उवाच ।
SP0250231 ततो देवी महाभागा शैलादेरददद्वरम् ।
SP0250232 सोऽब्रवीत्त्वयि भक्तिर्मे सदैवानपगा भवेत् ॥
SP0250241 ततो मरुत्सुता चैव उभाभ्यामपि चोदिता ।
SP0250242 वरं वृणु यथेष्टं वै ताविदं प्रत्युवाच ह ॥
SP0250251 युवयोरस्तु भक्तिर्मे तथा भर्तरि चैव हि ।
SP0250252 नित्यं चानपगा स्यान्मे धर्मे च मतिरुत्तमा ।
SP0250253 एतदिच्छामि देवेशौ वरं वरसहस्रदौ ॥
SP0250260 सनत्कुमार उवाच ।
SP0250261 ततस्तावेवमेतत्ते भवितेति शुचिस्मिते ।

SP0250262 ऊचतुर्मुदितौ देवौ स्नुषां तां वरवर्णिनीम् ॥
SP0250271 गणाश्चास्य ततोऽभ्येत्य सर्वे देवप्रियेप्सया ।
SP0250272 वरं ददुर्महासत्त्वाः स वव्रे काञ्चनप्रभः ॥
SP0250281 युष्मासु मम भक्तिश्च ऐश्वर्यं चापि संमतम् ।
SP0250282 वश्याश्च यूयं सर्वे मे प्रियो युष्माकमेव च ॥
SP0250290 गणा ऊचुः ।
SP0250291 भवान्मन्तानुमन्ता च गतिरागतिरेव च ।
SP0250292 अस्माकमीशः सर्वेषां देवानामपि चेश्वरः ॥
SP0250301 कुष्माण्डानां वरिष्ठश्च रुद्राणां त्वं महाबलः ।
SP0250302 ईतीनां द्वारपालश्च प्रमथानां तथैव च ॥
SP0250311 महाबलो महायोगी सेनानीस्त्वं हि नो मतः ।
SP0250312 त्वं भूतो भूतनेता च नायकोऽथ विनायकः ॥
SP0250321 ग्रहाणामधिपश्चैव उग्रदण्डधरस्तथा ।
SP0250322 त्वमग्रयोधी शत्रुघ्नस्त्वं वीरस्त्वं दिवस्पतिः ॥
SP0250331 महानुभावस्त्वं चैव क्षीरोदनिलयश्च ह ।
SP0250332 जप्येश्वरनिकेतश्च जप्येश्वरविभावितः ॥
SP0250341 भावनः सर्वभूतानां वरदो वरदार्चितः ।
SP0250342 अस्माकं वरदश्चैव भव भूतेश्वर प्रभो ॥
SP0250350 सनत्कुमार उवाच ।
SP0250351 स एवं गणपैः सर्वैः स्तुतो नन्दीश्वरो विभुः ।
SP0250352 उवाच प्रणतः सर्वान्ब्रूत किं करवाणि वः ॥
SP0250361 त एवमुक्ता गणपाः सर्व एव महाबलाः ।
SP0250362 ऊचुस्तं दिव्यभावज्ञा देवदेवस्य संनिधौ ॥
SP0250371 त्वमस्माकं गणाध्यक्षः कृतो देवेन शम्भुना ।
SP0250372 अस्माभिश्चाभिषिक्तस्त्वं नायको धर्मदायकः ॥
SP0250381 स त्वं शिवश्च सौम्यश्च गुणवानगुणेष्वपि ।
SP0250382 क्षमाशौचदमोपेतो भव नः प्रियकृत्सदा ॥
SP0250390 सनत्कुमार उवाच ।
SP0250391 एवमुक्तस्तदा सर्वान्प्रणम्य बहुमानतः ।
SP0250392 शिरस्यञ्जलिमाधाय गणपानस्तुवत्तदा ॥
SP0250400 नन्द्युवाच ।
SP0250401 नमो वः सर्वभूतेभ्यो नमो योगिभ्य एव च ।
SP0250402 नमश्चाप्यनिकेतेभ्यो योगीशेभ्यो नमस्तथा ॥
SP0250411 नमः कामचरेभ्यश्च नम उग्रेभ्य एव च ।
SP0250412 मृत्युभ्यश्च यमेभ्यश्च कालेभ्यश्च नमो नमः ॥
SP0250421 नमः काञ्चनमालेभ्यः सर्वधर्मिभ्य एव च ।

SP0250422 नमो वो वधकेभ्यश्च अवध्येभ्यस्तथैव च ॥
SP0250431 नमः परमयोगिभ्यो जटिभ्यश्च नमो नमः ।
SP0250432 नमो वोऽदृश्यरूपेभ्यो विकृतेभ्यस्तथैव च ॥
SP0250441 नमो वल्कलवासेभ्यः कृत्तिवासेभ्य एव च ।
SP0250442 नमः श्वेताम्बरस्रग्भ्यश्चित्रस्रग्भ्यो नमो नमः ॥
SP0250451 धावद्भ्यश्च द्रवद्भ्यश्च प्रस्थितेभ्यो नमो नमः ।
SP0250452 नमो मुनिभ्यो गायद्भ्यो जपद्भ्यश्च नमो नमः ॥
SP0250461 नमः शरभरूपेभ्यः शतरूपेभ्य एव च ।
SP0250462 नमः पर्वतवासेभ्यो व्याघ्ररूपेभ्य एव च ॥
SP0250471 नमो मार्जाररूपेभ्यः काककोकेभ्य एव च ।
SP0250472 नमो दैवतरूपेभ्यः पवनेभ्यस्तथैव च ॥
SP0250481 नमोऽग्निभ्यस्तथाद्भ्यश्च वरुणेभ्यस्तथैव च ।
SP0250482 नमो धनेशरूपेभ्यः सर्वरूपिभ्य एव च ॥
SP0250491 नमश्चोदरवक्त्रेभ्यः सर्ववक्त्रेभ्य एव च ।
SP0250492 नमो वामनरूपेभ्यो वामरूपेभ्य एव च ॥
SP0250501 देवासुरमनुष्याणामाप्यायिभ्यो नमो नमः ।
SP0250502 नमो वः सर्वभूतानां नमो वः सर्वतः शुभाः ॥
SP0250511 ग्रहेभ्यश्च नमो वोऽस्तु मोक्षेभ्यश्च नमस्तथा ।
SP0250512 शुभेभ्यश्च नमो वोऽस्तु अशुभेभ्यस्तथैव च ।
SP0250513 मम सौम्याः शिवाश्चैव भवन्तु गणनायकाः ॥
SP0250521 इति स्तुता गणपतयो महाबलाः शुभैर्वचोभिः सुरशत्रुनाशनाः ।
SP0250522 दिशन्तु मे सुखमतुलं सुखप्रदा बलं च वीर्यं स्थिरतां च संयुगे ॥
SP0250531 तपोऽक्षयं स्थानमथातुलां गतिं यशस्तथाग्र्यं बहु धर्मनित्यताम् ।
SP0250532 दिशन्तु सर्वं मनसेप्सितं च मे सुरेश्वराः पुष्टिमनुत्तमां तथा ॥
SP0250540 सनत्कुमार उवाच ।
SP0250541 इमौ नन्दिगणेन्द्राणां स्तवौ योऽध्येति नित्यशः ।
SP0250542 सोऽश्वमेधावभृथवत्सर्वपापैः प्रमुच्यते ॥
SP0250551 सन्ध्यायामपरस्यां तु जपन्पापं दिवाकृतम् ।
SP0250552 पूर्वस्यां संत्यजेद्वापि सर्वरात्रिकृतं जपन् ॥
SP0250560 सनत्कुमार उवाच ।
SP0250561 ततस्ते गणपाः सर्वे संस्तुतास्तेन धीमता ।
SP0250562 निसृष्टाश्च तदा जग्मुः प्रणिपत्य वृषध्वजम् ॥
SP0250571 देवाश्च सर्वलोकाश्च ततो देवः स्वयं प्रभुः ।
SP0250572 सृष्ट्वा नन्दीश्वरगृहं प्रदाय च महामनाः ।
SP0250573 ईप्सितं सह देव्या वै जगाम स्थानमव्ययम् ॥
SP0250581 य इमं नन्दिनो जन्म वरदानं तथैव च ।

SP0250582 अभिषेकं विवाहं च पठेद्वा श्रावयीत वा ।
SP0250583 ब्राह्मणः स मृतो याति नन्दीश्वरसलोकताम् ॥
SP0250591 यो नियतस्तु पठेत्प्रयतात्मा सर्वमिमं प्रणतो भवभक्त्या ।
SP0250592 सोऽपि गतः परलोकविचारी नन्दिसमोऽनुचरो हि मम स्यात् ॥
SP0259999 इति स्कन्दपुराणे पञ्चविंशतिमोऽध्यायः ॥

---

Text available at Institute of Indian Studies of the University of Groningen
http://www.theol.rug.nl/ bakker/sp.htm
Adhyaaya 26-52 are in preparation.

---

Please send corrections to sanskrit@cheerful.com
Last updated January 13, 2002